1. Title Bhāgavata Purāṇa Ṭīkā
   Prathama Skandha
2. Accession No. 5556
3. Folio No/Pages 59
4. Lines 17-18
5. Size 38 × 22.5Cm
6. Substance Paper
7. Script Devanāgarī
8. Language Sanskṛit

Bhāgavata - Purāṇa (Prathama Skandha)

59p.

Language - Sanskṛit, Hand Written.

Size. 39 x 24 Cm.

(ॐ नमो भगवते वासुदेवाय ॥ ॐ नम सरस्वत्यै ------
बद मुंनमामि पर मानंदाकृति मायवम्)

3

०२०
२८१

भागवत पुराण

सटीक

श्री॰ भा॰ प्र॰ टी॰

ॐ श्रीगणेशाय नमः॥ ॐ नमो भगवते वासुदेवाय॥ ॐ नमः सरस्वत्यै॥ ॐ परमहंसास्वादितचरणकमलचिन्मकरं-
दाय भक्तजनमानसनिवासाय श्रीरामचंद्राय नमः॥ ॐ वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि॥ यस्यास्ते हृदये सं-
वित्तं नृसिंहमहं भजे॥१॥ ॐ विश्वसर्गविसर्गादिनवलक्षणलक्षितं॥ श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत्
ॐ माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ॥ वंदे परस्परात्मानौ परस्परनतिप्रियौ॥३॥ ॐ क्वाहं मंदमतिः क्वेदं म-
थनं क्षीरवारिधेः॥ किं तत्र परमाणुर्वै यत्र मज्जति मंदरः॥४॥ संप्रदायानुरोधेन पौर्वापर्यानुसारतः॥ श्रीभागवतभा-
वार्थदीपिकेयं प्रतन्यते॥५॥ मूकं करोति वाचालं पंगुं लंघयते गिरिं॥ यत्कृपा तमहं वंदे परमानंदमाधवं॥६॥ श्रीम-
द्भागवते नाम सर्गादि दशलक्षणं॥ महत्पुराणमस्य च पंचलक्षणमिष्यते॥७॥ तत्र द्वादशस्कंधैर्दशभिर्लक्षितो-
ऽत्र पुराणं तद्विदो विदुः॥ कविभिश्च विधिर्ब्रह्मन्महदल्पव्यवस्थयेति॥८॥ श्रीमद्भागवताभिधः सुरतरुस्तारांकुरः
सज्जनिः स्कंधैर्द्वादशभिस्ततः प्रविलसद्भक्त्यालवालोदयः॥ द्वात्रिंशत्त्रिशतं च यस्य विलसच्छाखाः स-
हस्राण्यलं॥ पर्णान्यष्टदशेष्टदोतिसुलभो वर्वर्ति सर्वोपरि॥१०॥ अथ नानापुराणशास्त्र-
प्रबंधैश्चित्तप्रसत्तिमलभमानस्तत्र तत्रापरितुष्यन्नारदोपदेशतः॥ श्रीमद्भगवद्गु-
णवर्णनप्रधानं श्रीमद्भागवतशास्त्रं प्रारिप्सुः श्रीवेदव्यासस्तत्प्रतिपाद्य-
देवतानुस्मरणलक्षणं मंगलमाचरति॥ ॐ जन्माद्यस्येति॥ ॐ
नमो भगवते नारायणाय पुरुषोत्तमाय सलक्ष्मीकाय स-
वाहनाय साग्रजाय सपरिवाराय नमः॥॥॥ ॐ
रामाय कमलचरणाय नमः॥॥॥ ॐ श्री
कृष्णाय नमो नमः॥

१म

परंपरमेश्वरं धीमहीति ॥ ध्यायतेर्लिङि छांदसं आत्मनेपदमित्यर्थः ॥ बहुवचनं च शिष्याभिप्रायेण ॥ तमेव स्वरूपतटस्थलक्षणाभ्यां लक्ष
यलक्षयति ॥ तत्र स्वरूपलक्षणं सत्यमिति ॥ सत्यत्वे हेतुः ॥ यस्मिन्न त्रयाणां मायागुणानां तमोरजः ॥ सत्वानां सर्गो भूतें
द्रियदेवतारूप ॥ अमृषा सत्यः ॥ यत्सत्यतया मिथ्यासर्गोपि सत्यवत्प्रतीयते तं परं सत्यमित्यर्थः ॥ अत्र दृष्टांतः ॥ तेजोवारि मृदां
यथा विनिमयो व्यत्ययः अन्यस्मिन्नन्यावभासः ॥ स यथाधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः ॥ तत्र तेजसि वारिबुद्धिः मरीचि
तोये प्रसिद्धा ॥ मृदि काचादौ वारिबुद्धिः वारिणि काचादिबुद्धिरित्यादि ॥ यथायथमूह्यं ॥ यद्वा तस्यैव परमार्थसत्यत्वप्र
तिपादनाय तदितरस्य मिथ्यात्वमुक्तं ॥ यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति यत्रेति ॥ अनेन प्रतीतसर्गाधिष्ठानत्वं सर्वथा नयति ॥
स्वेनैव धाम्ना महसा निरस्तकुहकं कपटं यस्मिंत ॥ तटस्थलक्षणमाह ॥ जन्मादीति ॥ अस्य विश्वस्य जन्मस्थितिभंगा यतो

ॐ जन्माद्यस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यंति यत्सूरयः ॥ तेजोवारि
मृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १ ॥ ॥ राम ॥

व्यावृत्तत्वात २

भवति [illegible] ॥ तं धीमहीति ॥ तत्र हेतुः ॥ अन्वयादितरतश्चार्थेषु कार्येषु परमेश्वरस्य सद्रूपेणान्वयात् ॥ अकार्ये
भ्यः खपुष्पादिभ्यश्च व्यतिरेकात् ॥ यद्वान्वयशब्देनानुवृत्तिः इतरशब्देन व्यावृत्तिः ॥ अनुवृत्तत्वात् ॥ सद्रूपं ब्रह्म कार
णं मृत्सुवर्णादिवत् ॥ विशेषकार्यं घटकुंडलादिवदित्यर्थः ॥ यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि य
यतो भवतीति संबंधः ॥ तथा च श्रुतिः ॥ यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभिसंविशंतीत्याद्या
द्या ॥ स्मृतिश्च ॥ यतः सर्वाणि भूतानि भवंत्यादियुगागमे ॥ यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये ॥ इत्याद्या ॥ तर्हि किं प्रधा
नं जगत्कारणं स्यात् ॥ प्रधानमभिप्रेत्य नेत्याह ॥ अभिज्ञ इति ॥ स ऐक्षत लोकान्नु सृजा इति ॥ स इमाँल्लोकानसृजत इति श्रु
तेः ॥ ईक्षतेर्नाशब्दमिति न्यायाच्च तर्हि जीवः स्यात् नेत्याह ॥ स्वराट् स्वेनैव राजते यः स्वतः ॥ सिद्धज्ञान इत्यर्थः ॥ तर्हि किं ब्र

श्री॰
भाग॰
टी॰ १

स्मा॥ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्॥ तेने इत्यादि कवये ब्रह्मणेपि ब्रह्म वेदं यः तेने प्रकाशि
तवान्॥ यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै॥ तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये
इति श्रुतेः॥ ननु ब्रह्मणोन्यतो वेदाध्ययनमप्रसिद्धं सत्यं तत्तु हृदा मनसैव तेने॥ अनेन बुद्धिवृत्तिप्रवर्तकत्वेन गाय
त्र्यर्थो दर्शितः धियो यो नः प्रचोदयादिति॥ प्रचोदिता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि॥ स्वलक्षणा प्रादुरभूत्किला
स्यतः स मे ऋषीणामृषभः प्रसीदतामिति॥ ननु च ब्रह्मा स्वयमेव समस्तप्रतिबुद्धः स्यात् अत एव दर्शप्रलम्भता॥ तेनाह॥ यद्य
स्मिन् ब्रह्मणि सूरयोपि मुह्यन्तीति तस्मादुःस्वापेपि पराधीनज्ञानत्वात्तं तः सिद्धज्ञानः परमेश्वर एव जगत्कारणं॥ अ
त एव सत्यः असतः सत्ताप्रदत्वात्परमार्थसत्यः॥ सर्वज्ञत्वेन च निरस्तकुहकः तं धीमहीति गायत्र्याः प्रारंभेण च
गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितं॥ यथोक्तं मत्स्यपुराणे पुराणदानप्रस्तावे॥ यत्राधिकृत्य गायत्रीं
वर्ण्यते धर्मविस्तरः॥ वृत्रासुरवधोपेतं तद्भागवतमिष्यते लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितं॥ प्रौष्ठपद्यां
पूर्णमास्यां स याति परमं पदं॥ अष्टादशसहस्राणि पुराणं तत्प्रकीर्तितम्॥ पुराणांतरे च॥ ग्रंथोष्टादशसाह
स्रो द्वादशस्कंधसंमितः॥ हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा॥ गायत्र्या च समारंभः तद्वै भागवतं विदुः॥ पद्म
पुराणेंबरीषं प्रति गौतमवचनम्॥ अंबरीषशुकप्रोक्तं नित्यं भागवतं शृणु॥ पठस्व स्वमुखेनापि यदी
च्छसि भवक्षयमिति॥ अत एव भागवतं नामान्यदित्यपि न शंकनीयम्॥१॥ इदानीं श्रोतृ
प्रवर्तनाय श्रीभागवतस्य काण्डत्रयविषयेभ्यः सर्वशास्त्रेभ्यः श्रैष्ठ्यं दर्शय
ति॥ धर्म इति॥ ॥॥ नमः॥

८

9

प्रातःकालेहुताएवहुताअग्नयोयैस्ते ॥ अनेननित्यनैमित्तिकहोमसाकल्यंदर्शितं ॥ इदंवक्ष्यमाणंआदरात्पप्रच्छुः ॥५॥ विविदिषि
तानर्थान्स्पृष्टसूत तससर्वज्ञास्त्वंजानातीत्यायमाहुः ॥ त्वयेतित्रिभिः श्लोकैः ॥६॥ इतिहासैर्महाभारतादिः तत्सहितानिकेव
लमधीतानिनअपितत्राख्यातान्यपिव्याख्यातानीत्यर्थः ॥ उतअपियानिधर्मशास्त्राणितान्यपिकिंचयानीत्यादिविदाविदुषो

तएकदातुमुनयःप्रातर्हुतहुताग्नयः ॥ सत्कृतंसूतमासीनंपप्रच्छुरिदमादरात् ॥५॥ ऋषयऊचुः त्वया
खलुपुराणानिसेतिहासानिचानघ ॥ आख्यातान्यप्यधीतानिधर्मशास्त्राणियान्युत ॥६॥ यानिवेदविदांश्रे
ष्ठोभगवान्बादरायणः ॥ अन्येचमुनयःसूतपरावरविदोविदुः ॥७॥ वेत्थत्वंसौम्यतत्सर्वंतत्त्वतस्तदनुग्रहात्
ब्रूयुःस्निग्धस्यशिष्यस्यगुरवोगुह्यमप्युत ॥८॥ तत्रतत्रांजसायुष्मन्भवतायद्विनिश्चितम् ॥ पुंसामेकान्त
तःश्रेयस्तन्नःशंसितुमर्हसि ॥९॥ प्रायेणाल्पायुषःसभ्यकलावस्मिन्युगेजनाः ॥ मंदाःसुमंदमतयोमंद
भाग्याह्युपद्रुताः ॥१०॥ भूरीणिभूरिकर्माणिश्रोतव्यानिविभागशः ॥ अतःसाधोत्रयत्सारंसमुद्धृत्यमनीष
या ॥११॥ ब्रूहिनःश्रद्दधानानांयेनात्मासंप्रसीदति ॥ सूतजानासिभद्रंतेभगवान्सात्वतांप
ति ॥१२॥ ॥ रामजी

मध्येश्रेष्ठःव्यासःयानिवेद ॥ परावरेसगुणनिर्गुणेब्रह्मणीविदंतीतितथा ॥ वेत्थजानासि ॥ सौम्य हेसाधो तेषा
मनुग्रहात् ॥ तत्त्वतोज्ञानेहेतुमाह ब्रूयुरिति ॥ स्निग्धस्यप्रेमवतः उतएवरहस्यमपिब्रूयुरेव ॥८॥ अंजसासुगमत्वेन
एकांततःश्रेयः अव्यभिचारिश्रेयःसाधनं ॥९॥ अस्मिंस्तुवर्तमानेकालेनवहुशास्त्रश्रवणादिभिर्विनिश्चयंगच्छेति
॥ तत्रहेतुमाहुः प्रायेणेति ॥१०॥ ॥ १२ ॥॥

श्री भा. प्र. टी. ५

हेसभ्य साधो अस्मिन्युगे कलौ अल्पायुषो जनाः ॥ तत्रापि मंदा अलसाः ॥ तत्रापि सुमंदमतयः तत्रापि मंदभाग्या विघ्नाकुलाः तत्रापि उपद्रुता रोगादिभिः ॥ न चैवं कुशास्त्रश्रवणेपि तावन्नैव फलसिद्धिः स्यादत आह ॥ भूरीणि कर्माणि यत्र श्रेयोनियं श्रुतानि सं मुद्धृत्य यथा बुद्ध्या स्वमुद्धृत्य येन येनात्मा मनः सुप्रसीदति तस्मात्... श्रोतव्यं तज्ज्ञानासि त्वमिति पंचभिः भद्रं ते इति सौतस्य कथनाशीर्वादः ॥ भगवानांगिरसः... सात्वतां ... मूर्त्तिः वासुदेवस्य ... यां वि धित एषामिति सात्वतां भक्ताः ॥ स्वार्थं ... ॥ ... ते देवैः सात्वतां नरहति भवति ॥ तेषां पा तिः पालकः ॥ यस्यार्थे विशेषस्य चिकीर्षया वसुदेवस्य भार्यायां देवक्यां जातः ॥ अंशेनावतीर्णस्य चिकीर्षितं अर्हसि ॥ सात्वता

देवकीं वसुदेवस्य जातो यस्य चिकीर्षया ॥ तन्नः शुश्रूषमाणानामर्हस्यंगानुवर्णितुं ॥ १२ ॥ यस्यावतारो भूतानां क्षे माय च भवाय च ॥ आपन्नः संसृतिं घोरां यन्नाम विवशो गृणन् ॥ ततः सद्यो विमुच्येत यद्बिभेति स्वयं भयं ॥ यत्पादसं श्रयाः सूत मुनयः प्रशमायनाः ॥ सद्यः पुनंत्युपस्पृष्टाः स्वर्धुन्यापोनुसेवया ॥ १५ ॥ को वा भगवतस्तस्य पुण्य श्लोकेड्यकर्मणः ॥ शुद्धिकामो न शृणुयाद्यशः कलिमलापहं ॥ १६ ॥ तस्य कर्माण्युदाराणि परिगीतानि सूरिभिः ब्रूहि नः श्रद्दधानानां लीलया दधतः कलाः ॥ १७ ॥ अथाख्याहि हरेर्धीमन्नवतारकथाः शुभाः ॥ लीला विदधतः स्वैरमीश्वरस्यात्ममायया ॥ १८ ॥ ॥

यन्न स्तावद् यस्यावतारो भूतानां क्षेमाय पालनाय भवाय समृद्धये ॥ १३ ॥ तत्प्रभावमनुवर्णयंतः तद्यशःश्रवणोत्सुका मा विशुद्धेति आपन्न इति विभिः ॥ १४ ॥ संसृतिमापन्नः प्राप्तः विवशोपि ततः ... ततः ... भयमपि स्वयं बिभेति ॥ किंच यस्य पादः संश्रयो येषां मत एव प्रशमः ॥ अयनं वर्त्म आश्रयो वा येषां ते प्रशमायनाः ॥ उपस्पृष्टाः सन्निधिमात्रेण सेविताः ॥ सद्यः पुनंति स्वर्धुनी गंगा तस्या आपः ॥ ... सेवयैव पुनंति ॥ अनु सेवया पुनंति ॥ ... इति शुनो ... ॥ पुण्यश्लोकैरीड्यानि कर्माणि यस्य तस्य यशः ॥ ... उदाराणि महांति ... कलाः ... अवताराः कथाः ...

कलिमलापहं संसार दुःखोपशमं

अत्र श्रीमति सुंदरे श्रीभागवते परमो धर्मो निरूप्यते॥ परमत्वे हेतुं॥ प्रकर्षेणोज्झितं कैतवं फलाभिसंधिलक्षणं कपटं यस्मिन् सः॥
प्रशब्देन मोक्षाभिसंधिरपि निरस्तः॥ केवलमीश्वराराधनलक्षणो धर्मो निरूप्यते इति॥ अधिकारितोपि धर्मस्य परमत्वमाह॥ नि
र्मत्सराणां परोत्कर्षासहनं मत्सरः॥ तद्रहितानां सतां भूतानुकंपिनां॥ एवं कर्मकांडविषयेभ्यः शास्त्रेभ्यः श्रैष्ठ्यमुक्तं॥ ज्ञान
कांडविषयेभ्योपि श्रैष्ठ्यमाह॥ वेद्यमिति॥ वास्तवं परमार्थभूतं वस्तु वेद्यं॥ न तु वैशेषिकादीनामिव द्रव्यगुणादिरूपं॥ यद्वा वा
स्तवशब्देन वस्तुनोंशो जीवः वस्तुनः शक्तिर्माया वस्तुनः कार्यं जगच्च तत्सर्वं वस्त्वेव न ततः पृथगिति॥ वेद्यमयत्नेनैव ज्ञातुं
शक्यं॥ ततः किमत आह॥ शिवदं परमसुखदं॥ किंच॥ आध्यात्मिकादितापत्रयोन्मूलनं च॥ अनेन ज्ञानकांडविषयेभ्यः श्रै
ष्ठ्यं दर्शितं॥ कर्तृतोपि श्रैष्ठ्यमाह॥ महामुनिः श्रीनारायणः तेन प्रथमं संक्षेपतः कृते देवताकांडगते श्रैष्ठ्यमाह॥ परैः शास्त्रै

धर्मः प्रोज्झितकैतवोत्र परमो निर्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनं॥ श्रीमद्भागवते म
हामुनिकृते किं वा परैरीश्वरः॥ सद्यो हृद्यवरुध्यतेत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥ २॥ ॐ निगमकल्पतरो
र्गलितं फलं शुकमुखादमृतद्रवसंयुतं॥ पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः॥ ३॥

स्तदुक्तैः साधनैर्वा ईश्वरो हृदि किं सद्य एव अवरुध्यते स्थिरीक्रियते॥ वा शब्दः कटाक्षे॥ किंतु विलंबेन कथंचिदेव अत्र तु शुश्रूषुभिः
श्रोतुमिच्छद्भिरेव तत्क्षणादेवावरुध्यते इदमेव तर्हि किमिति सर्वे न शृण्वंति॥ तत्राह कृतिभिरिति॥ सुकृतिभिः पुण्यैर्विना
नोत्पद्यते इत्यर्थः॥ तस्मात्कांडत्रयार्थस्यापि यथावत्प्रतिपादनादिदमेव सर्वशास्त्रेभ्यः श्रेष्ठं॥ अतो नित्यमेतदेव श्रोत
व्यमिति भावः॥ २॥ इदानीं तु न केवलं सर्वशास्त्रेभ्यः श्रेष्ठत्वादस्य श्रवणं विधीयते॥ अपि तु सर्वशास्त्रफलरूपमिदं।
अतः परमादरेण सेव्यमित्याह निगमेति॥ निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वात्॥ तस्य फलमिदं भाग
वतं नाम तत्तु वैकुंठगतं नारदेनानीय मह्यं दत्तं मया च शुकस्य मुखे निहितं॥ तच्च तन्मुखात् भुवि गलितं शिष्यप्र
शिष्यादिरूपपल्लवपरंपरया॥ शनैरखंडमेवावतीर्णं॥ न तु उच्चनिपातात्स्फुटितमित्यर्थः॥ ३॥ एतच्च भविष्यद
पि भूतवन्निर्दिष्टमनागतार्थप्राप्त्याने नैवास्य शास्त्रस्य प्रवृत्तेः॥ अत एवामृतद्रवेण संहितं॥ लोके हि शुकमुखस्पृष्टं
फलममृतमिव स्वादु भवतीति प्रसिद्धं॥ अत्र शुको मुनिः॥ अमृततया परमानंदः स एव द्रवो रसः॥ रसो वै सः॥ रसं ह्येवायं लब्ध्वा

नंदीभवतीति सूचितं ॥ अत: हे रसिका: रसज्ञा: तत्रापि भावुका: ॥ हे रसविशेषभावनाचतुरा: अहो भुवि गलितमिति अलभ्यला-
भोक्ति: ॥ इदं भागवतं नाम फलं मुहु: पिबत ॥ ननु त्वगस्थ्यादिकं विहाय फलाद्रस: पीयते कथं फलमेव पातव्यं तत्राह र-
सं रसरूपं ॥ अत: त्वगस्थ्यादिहेयांशाभावात् ॥ फलमेव कृत्स्नं पिबत ॥ अत्र च रसतादात्म्यविवक्षया रसवत्स्याविवक्षित-
त्वाद्गुणवचनेपि समशब्देऽपि नपुं॥ आलयमालयं ॥ न तु विनैव रसो फलमिति मुक्तानामपि नायिकत्वरणं ॥ तच्च फलमित्युक्ते यो नास-
भ्य वो हेयांशप्रसक्तिसंभवेदिति तन्निरुत्यर्थं रसमित्युक्तं ॥ रसमित्युक्तेपि गलितमपरसस्पपातसंभावत्वात् ॥ फलमित्यु-
क्तेऽद्रष्टव्यं ॥ न तु भावावतारमृतपाने सोमोपिकामासिमाह ॥ आलयं लयो मोक्ष: ॥ अभिविधावाकार: ॥ लयमभिव्या-
प्य न हीदं स्वर्गादिसुखवन्मुक्तैरुपेक्ष्यते किंतु सेव्यत एव वक्ष्यति हि ॥ आत्मारामाश्च मुनयो निर्ग्रंथा अप्युरुक्रमे कुर्वं-
त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिरिति ॥ ३ ॥ नदेवंभूतमेवच्छ्रोभाकं येएविशिष्टदेवतीलारणपूर्वकं प्राविशिन तस्य शा-
स्त्रस्य विषयप्रयोजनादिसंबंधाधिकारिणो विशिष्य नास्ते सह्वतेनतं श्रोतॄन्नमिसाख्यीकृत्य शास्त्रमारभते नैमिष इति ॥

ॐ नैमिषेऽनिमिषक्षेत्रे ऋषय: शौनकादय: ॥ सत्रं स्वर्गाय लोकाय सहस्रसममासत ॥ ४ ॥

इति ॥ श्रीब्रह्मणा विसृष्टस्य मनोमयचक्रस्य नेमि: शीर्यते कुंठीभवति यत्र तन्नैमिषं ॥ नैमिषमेव नैमिषं ॥ तथा च वायवीये ए-
तन्मनोमयं चक्रं मया सृष्टं विसृज्यते ॥ यत्रास्य शीर्यते नेमि: स देश: तपस: शुभ: ॥ इत्युक्त्वा सूर्यसंकाशं चक्रं सृष्ट्वा मनोमयं ॥
प्रणिपत्य महादेवं विससर्ज पितामह: ॥ तेपि हृष्टतरा विप्रा: प्रणम्य जगतां प्रभुं ॥ प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्यत ॥ त-
द्वनं तेन विख्यातं नैमिषं मुनिपूजितं इति ॥ नैमिषे इति पाठे ॥ वराहपुराणोक्तं द्रष्टव्यं ॥ तथा हि ॥ गौरमुखमुनिं प्रति श्रीभग-
वद्वाक्यं ॥ एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ॥ उवाच निमिषेणेदं निहतं दानवं बलं ॥ अरण्येस्मिंस्ततस्त्वेवं नैमिषार-
ण्यसंज्ञितं ॥ भविष्यति यथार्थं वै ब्राह्मणानां विशेषकमिति ॥ अनिमिष: श्रीविष्णुस्तस्य क्षेत्रे इति तदाराधनात् ॥ तस्य क्षेत्रे तेन यथावचे-
व शौनकादिवचनं तेते सिद्धेव निकषवसमिति स्वर्गाय तु न इति ॥ स्वर्गायो हरि: समवन्नो क:भक्तानां निवासस्थानं तत्र स्वसं
मयेश्वमर्षा: ॥ सहस्रं समा: संवत्सरा अनुष्ठानकालो यस्य तत् सहस्रसमं सत्रं कर्म आसत उपविविशु: ॥ यद्वा आस

श्री॰ भाग॰ टी॰ ५

तदेवंप्रथमेध्यायेषट्प्रश्नामुनिभिःकृताः॥ द्वितीयेतुततःसूतःउत्तराण्याहतेष्वथ॥ विप्राणामितिएवंभूतैःसम्यक्प्रश्नैःस
म्यक्कृतःहृष्टः॥ रोमहर्षणस्यपुत्रःउग्रश्रवाः तेषांवचःप्रतिपूज्यसत्कृत्यप्रवक्तुमुपक्रांतवान्॥ प्रवचनस्योपक्रमेगुरुदेव
तानमस्कारइतितमाहद्विभिः॥ ॥तत्रस्वगुरुंश्रीशुकदेवंसमस्तंतद्गुरितेनैवध्यानयन्नाह॥ यंप्रव्रजंतंसंन्यासायगच्छंतं॥ अ
नुपेतमनुपनयनस्तिउपनयनमकृत्यमेवअनुपासतं॥ यद्वालौकिकानाअनुपेतंस्वेयुगात्मेकाकिनमित्यर्थः॥ तत्रहेतुः॥ अपेतकृत्यंअकृ
तमस्पृष्टंकर्ममार्गेपिप्रवर्तमानंनैष्ठिकत्वात्॥ द्वैपायनःश्रीव्यासदेवः॥ विरहात्कातरोभीतः॥ पुत्रइतिमुखेनकृतेनाजुहा

व्यासउवाच॥ इतिसंप्रश्नसंहृष्टोविप्राणांरोमहर्षणिः॥ प्रतिपूज्यवचस्तेषांप्रवक्तुमुपचक्रमे॥१॥ सूतउवाच
यंप्रव्रजंतमनुपेतमपेतकृत्यंद्वैपायनोविरहकातरआजुहाव॥ पुत्रेतितन्मयतयातरवोभिनेदुःतंसर्वभूतहृ
दयंमुनिमानतोस्मि॥२॥ यःस्वानुभावमखिलश्रुतिसारमेकमध्यात्मदीपमतितितीर्षतांतमोंधं॥ संसा
रिणांकरुणयाहपुराणगुह्यंतंव्याससूनुमुपयामिगुरुंमुनीनाम्॥३॥ ॥४ ॐनमस्मेश्रीरामायनमोनमः ति

व॥ आहूतवान्॥ हस्तदाहूतेस्मुतेसत्यपिसंयियार्षः॥ तदातन्मयतयाश्रीशुकदेवरूपतयातरवोभिनेदुः॥ हेतातःप्रह
तरमुक्तवंतः॥ पितृस्नेहात्रवेयपविहारायवाहूतेरूपेणाडग्रंवदन्तवानित्यर्थः॥ तंमुनिमानतोस्मितन्मयत्वोपपादनायवि
शेषणंसर्वभूतानांहृत्मनः अथतेयोगबलेनप्रविशतीतिसर्वभूतहृदयःतं॥२॥ कृपालुतांदर्शयन्नाह॥ यइति॥ अंधंगा
ढंतमःसंसारंतांअतितितीर्षतांतोपुराणानांमध्येगोप्यं॥ तत्रहेतुत्वेनचत्वारिविशेषणानिस्वःनिजःअसाधारणः
अनुभावःप्रभावोयस्यतत्स्वानुभावमखिलश्रुतीनांसारं॥ एकमद्वितीयंअनुपममित्यर्थः॥ आत्मानंकार्यकारणसंघा
तेअधिकृत्यवर्तमानमात्मतत्त्वंअध्यात्मंतस्यदीपंसालात्प्रकाशकमुपयामिशरणंव्रजामि॥३॥ ॥ ५

14

एवं महत्त्वं कथयन् पुनरपि तच्चरितामेव श्रोतुमिच्छतः ॥ तत्रात्मनः तृप्त्यभावमावेदयंति ॥ १९ ॥ योगयागादिषु तृप्ताः स्मः उ
त्तमश्लोकस्य तु न तृप्यामः ॥ तथाभूतः श्लोको यस्य यशो यस्य तस्य विक्रमे न वितृष्णा न तृप्यामः ॥ अलमिति न मन्यामहे त
त्र हेतुः यद्विक्रमं शृण्वतां ॥ यद्वा येन रूपेण तन्नामसु ॥ एवं तु नेति ॥ तत्र हि स्वान्तः प्रथममर्थः ॥ यथा स्थलं तु हि भवति ॥ उद
रादिभरणेन वा रसज्ञानेन वा ॥ स्वादुविशेषाभावाद्वा ॥ तत्र पुनः स्वतोऽभिमतेन ॥ अत्र तु स्वाकाशनात्मभरणमित्युक्ते ॥ र
सज्ञानामिमत्वे न वा ज्ञानतः ॥ पशुवन्नृभिर्निमित्तं कृतात् द्रव्यभक्षणाद्वृद्धैस्तस्याभावेन तृप्तिर्विनाशकेति ॥ पदे पदे प्रतिक्षणं
स्वादुतोऽपि स्वादु ॥ अतः श्रीकृष्णचरितानि कथयेत्याशयेनाहुः ॥ कृतवानिति ॥ अतिमर्त्यानि ॥ मर्त्यानतिक्रांतानि वीर्याणि

वयं तु न वितृप्याम उत्तमश्लोकविक्रमे । यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥ १९ ॥ कृतवान्किल वीर्याणि सह रा
मेण केशवः । अतिमर्त्यानि भगवान् गूढः कपटमानवः ॥ २० ॥ कलिमागतमाज्ञाय क्षेत्रेऽस्मिन्वैष्णवे वयं । आ
सीना दीर्घसत्रेण कथायां सक्षणा हरेः ॥ २१ ॥ त्वं नः संदर्शितो धात्रा दुस्तरं निस्तितीर्षतां ॥ कलिं सत्वहरं पुं
सां कर्णधार इवार्णवम् ॥ २२ ॥ ब्रूहि योगेश्वरे कृष्णे ब्रह्मण्ये धर्मवर्मणि ॥ स्वां काष्ठामधुनोपेते धर्मः कं श
रणं गतः ॥ २३ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे नैमिषीयोपाख्याने प्रथमोऽध्यायः ॥ १ ॥ ॥ ॥ ॥

लब्धा

नोद्धरणादीनि मनुष्येषु संभावितानीत्यर्थः ॥ तत्र यागेन वाध्ययनादिना स्वर्गाणां कृत एवं श्रवणावकाशः स्यात् ॥ अत आ
हुः कलिमागतं ज्ञात्वा तद्भिया श्रीविष्णुपदं गंतुकामाः ॥ दीर्घसत्रेण निमित्तेनासीना हरेः कथायां सक्षणाः कृतावसरा
ः २१ अस्मिंश्च समये तव दर्शनमीश्वरेणैव संपादितमित्यभिनंदति त्वमिति ॥ २२ ॥ कलिं निस्तर्तुमिच्छतां अर्णवे ति
तीर्षतां कर्णधारो नाविक इव ॥ पुनः प्रश्नांतरं ब्रूहीति ॥ धर्मस्य वर्मणि कवच इव रक्षके स्वां काष्ठां मर्यादां स्वरूपमि
त्यर्थः ॥ अस्य चोत्तरं कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सहेत्ययं श्लोकः ॥ २३ ॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे

श्री भा.पु. टी. ६

तदेवं श्रीहरिभक्तिद्वारा ॥ तदितरस्य वैराग्यात्मज्ञानपर्यन्तः ॥ परो धर्म इत्युक्तं ॥ तस्याभक्तेरितरस्मिन्नप्यस्मिन्नवस्तुनि हृत्वा स्वर्गफल।
भोगो वैराग्यं अथ चेत्तन्मन्यन्ते धर्मस्यार्थः फलं ॥ तस्य च कामः फलं तस्य चेन्द्रियप्रीतिः तत्प्रीतेश्च पुनरपि धर्मार्थादिपरम्परेति ॥ य
थाहुः धर्मादर्थश्च कामश्च स किमर्थं न सेव्यत इत्यादि ॥ तन्निराकरोति धर्मस्येति द्वाभ्यां ॥ आपवर्ग्यस्य मोक्षपर्यन्तस्यापवर्गपर्य
न्तस्य ॥ अर्थाय फलत्वाय नोपकल्पते योग्यो न भवति ॥ तथार्थस्यापि एवंभूतधर्माव्यभिचारिणः ॥ कामो लाभाय फलत्वा
य न हि स्मृतो मुनिभिः कामस्य विषयभोगस्य इन्द्रियप्रीतिर्लाभः फलं न भवति ॥ किंतु यावता जीवेत ॥ तावानेव कामस्य लाभः
जीवनपर्याप्तः कामः सेव्य इत्यर्थः ॥ यदुक्तं ॥ आहारार्थं कर्म कुर्यादनिंद्यं कुर्यादाहारं प्राणसंधारणार्थं ॥ प्राणाः संधार्या
स्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन भूयो न दुःखमिति ॥ जीवस्य जीवनस्य च पुनः कर्मानुष्ठानद्वारा कर्मभिर्य इह प्रसिद्धः

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ॥ नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥ ९ ॥ कामस्य नेन्द्रिय
प्रीतिर्लाभो जीवेत यावता ॥ जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः ॥ १० ॥ वदन्ति तत्तत्त्वविदः तत्त्वं यज्ज्ञानम
द्वयम् ॥ ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥ ११ ॥ तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ॥ पश्यन्त्यात्मनि
चात्मानं भक्त्या श्रुतगृहीतया ॥ १२ ॥ अतः पुंभिर्द्विजश्रेष्ठा वर्णाश्रमविभागशः ॥ स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरि
तोषणम् ॥ १३ ॥

सोऽर्थो न भवति ॥ किंतु तत्त्वजिज्ञासैवेति ॥ ननु च तत्त्वजिज्ञासा नाम धर्मजिज्ञासैव ॥ धर्म एव हि तत्त्वमिति केचित् तत्राह
तत्त्वविदस्तु ॥ तदेव तत्त्वं वदन्ति किं तत् ज्ञानं नाम अद्वयमिति ॥ क्षणिकविज्ञानपक्षं निवर्तयति ॥ ननु तत्त्वविदोऽपि विगीतव
चना एव ॥ नैवं ॥ तस्यैव तत्त्वस्य नामान्तरैरभिधानादित्याह ॥ औपनिषदैर्ब्रह्मेति ॥ हैरण्यगर्भैः परमात्मेति सात्वतैर्भगवा
निति अभिधीयते ॥ ११ ॥ ननु तत्त्वं सपरिकरया भक्त्यैव प्राप्यत इत्याह ॥ तच्चेति सान्वयः ॥ ज्ञानवैराग्ययुक्तयेत्यत्र ज्ञानेन प
रोक्षं तत्त्वमात्मनि तद्ब्रह्म पश्यन्ति ॥ किं तत् ॥ आत्मानं परमात्मानं केन वेदान्तादिश्रवणेन गृहीतया प्राप्तया इति भा
क्त्येति ॥ अतो वर्णाश्रमधर्मस्य फलमुक्तं ॥ नार्थकामादि कर्मणो समर्थं उपायो पसंहरति ॥ अत इति ॥ १३ ॥ हे द्विजश्रेष्ठा हरितोषः

तोषणं हरेराराधनं संसिद्धिः फलं ॥ यस्माद्भक्तिविहीनो धर्मः केवलं श्रम एव ॥ त
स्माद्भक्तिप्रधान एव धर्मोऽनुष्ठेय इत्याह ॥ तस्मादिति ॥ १३ ॥

तर

जयत्यनेन संसारमिति जयो ग्रंथः ॥ तमुदीरयेदिति स्वयं तथोदीरयन् ॥ श्रोतॄन्वा तान् कथा उपशिक्षयति ॥ तेषां वचः प्रतिपूज्य स्तु-
ति यदुक्तं तन्मतिं सज्जनैकं करोति ॥ ४ ॥ हे मुनयः साधु यथा भवति तथाहं पृष्टः यतो लोकानां मंगलमेतत् ॥ यतः श्रीकृष्णविष-
यः संप्रश्नः कृतः सर्वशास्त्रार्थसारोद्धाररूपप्रश्नस्यापि कृष्णपर्यवसानादेवमुक्तं ॥ तत्र यत्पृष्टं प्रथमं सर्वशास्त्रस्य सारं ॥ ऐकांतिकं
श्रेयो ब्रूहीति ॥ तत्रोत्तरं स वै पुंसामिति ॥ अयमर्थः धर्मो द्विविधः प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च तत्र यः स्वर्गाद्यर्थः स
प्रवृत्तिलक्षणः सोऽपरः ॥ यतः स्वधर्मात् श्रवणादिलक्षणा भक्तिर्भवति स परो धर्मः ॥ स एवैकांतिकं श्रेय इति ॥ कथंभू-
ता अहैतुकी हेतुः फलानुसंधानं तद्रहिता अप्रतिहता विघ्नैरनभिभूता ॥ ५ ॥ ननु तमेवात्मानं वेदांतवचनेन ज्ञास्यामि

56

ॐ नारायणं नमस्कृत्य नरं चैव नरोत्तमं ॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥ ४ ॥ मुनयः साधु पृष्टोऽहं भ-
वद्भिर्लोकमंगलं ॥ यत्कृतः कृष्णसंप्रश्नो येनात्मा संप्रसीदति ॥ ५ ॥ स वै पुंसां परो धर्मो यतो भक्तिरधोक्षजे ॥ अ-
हैतुक्यप्रतिहता ययात्मा संप्रसीदति ॥ ६ ॥ वासुदेवे भगवति भक्तियोगः प्रयोजितः ॥ जनयत्याशु वैराग्यं
ज्ञानं यत्तदहैतुकं ॥ ७ ॥ धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः ॥ नोत्पादयेद्यदि रतिं श्रम एव हि केवलं

८

विविदिषंति ॥ यज्ञेन दानेन तपसानाशकेनेत्यादिश्रुतिभ्यो धर्मस्य ज्ञानं प्रत्यंगत्वप्रसिद्धेः तत्कथं तेन भक्तिहेतुत्वमुच्यते सत्यं तत्तु
भक्तिद्वारेणेत्याह वासुदेव इति ॥ अहैतुकं शुष्कतर्काद्यगोचरं औपनिषदमित्यर्थः ॥ ७ ॥ व्यतिरेकमाह धर्म इति यो ध-
र्म इति प्रसिद्धः ॥ स यदि विष्वक्सेनकथासु रतिं नोत्पादयेत् ॥ तर्हि स्वनुष्ठितोऽपि सन् ॥ अयं श्रमो ज्ञेयः ॥ ननु मोक्षार्थस्या-
पि धर्मस्य श्रमत्वमसंभवं ॥ अत आह ॥ केवलं हि फलश्रमरूपार्थः ॥ ननु तत्रापि स्वर्गादिफलमस्त्याशंक्य ॥ एवं का-
रणं निराकरोति ॥ न चिरस्थायित्वात् तत्फलमिति मर्थः ॥ न तत्रायं हेतुरेवावेत्यादिश्रुतेः ॥ न तु तस्य भवतीत्यादिश्रुतेः ॥ न तत्फ-
लस्यापि स्वर्गस्य नश्वरत्वादित्याशंक्याह ॥ द्विधाहेतुं न साधयति ॥ तद्यथेह कर्मजितो लोकः ॥ क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्ष-
ीयते ॥ इति तर्कानुगृहीतया श्रुत्या तत्फलप्रतिपादनात् ॥ ८ ॥ ॥

क्ष

श्री॰ भाग॰ स्कं॰ ८

अत्र सदाचारं दर्शयन्नुपसंहरति॥ अत इति॥ आत्मनः प्रसादनीं मनःशोधनीं वासुदेवे भक्तिं कुर्वंतीति भजनीयविशेषोद्
दिष्टः॥२२॥ ननु देवोपपादयितॄणां ब्रह्मादीनां च याथात्म्यमेकात्म्ये पि वासुदेवस्याधिक्यमाह॥ सत्त्वमिति॥ इह यद्यप्येक एव परः
पुमानस्य विश्वस्य स्थित्यादये स्थित्याद्यर्थं संज्ञाः केवलं भिन्ना धत्ते हरिविरिंचिहरा इति वक्तव्ये संधिरार्षः॥ तथापि तेषां म
ध्ये श्रेयांसि शुभफलानि सत्त्वतनोर्वासुदेवादेव स्युः॥२३॥ उपाधिवैशिष्ट्येन फलवैशिष्ट्यं सदृष्टान्तमाह॥ पार्थिवात्प्रवृ
त्तिप्रकाशरहितात्॥ दारुणः काष्ठाद्धूमः प्रवृत्तिस्वभावस्त्रयीमयो वेदोक्तकर्मप्रवर्त्तकः ईषत्कर्मप्रभासत्वेः॥ तस्मादप्य
ग्निस्त्रयीमयः साक्षात्कर्मसाधनत्वात्॥ एवं तमसः सकाशाद्रजः॥ रजसः सकाशात्सत्त्वं ब्रह्मदर्शनं॥ ब्रह्मप्रकाशकं
त्वं शब्देन लयात्मकत्वात्तमसः सकाशाद्रजसः सोपाधिकत्वान्नैतेन किंचिद्ब्रह्मदर्शनप्रयासस्तन्मात्रश्रुकेननत्वसर्वथा

अतो वै कवयो नित्यं भक्तिं परमया मुदा॥ वासुदेवे भगवति कुर्वंत्यात्मप्रसादनीं॥२२॥ सत्त्वं रजस्तम इति प्रकृतेर्गु
णास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते॥ स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युः॥ २२
पार्थिवाद्दारुणो धूमस्तस्मादग्निस्त्रयीमयः॥ तमसस्तु रजस्तस्मात्सत्त्वं यद्ब्रह्मदर्शनं॥२४॥ भेजिरे मुनयोऽथाग्रे
भगवंतमधोक्षजं॥ सत्त्वं विशुद्धं क्षेमाय कल्पंते येऽनु तानिह॥२५॥ मुमुक्षवो घोररूपान्हित्वा भूतपतीनथ॥ नाराय
णकलाः शांता भजंति ह्यनसूयवः॥२६॥ रजस्तमःप्रकृतयः समशीला भजंति वै॥ पितृभूतप्रजेशादीन् श्रियै
श्वर्यप्रजेप्सवः॥२७॥

विक्षेपकत्वात्
तमःप्रकाशकं न शब्देन लयात्मकत्वात् यत्सत्त्वं तत्साक्षाद्ब्रह्मदर्शनं॥ अतस्तद्गुणोपाधीनां ब्रह्मादीनाम
पि यद्यप्येवं वैशिष्ट्यमिति भावः॥२४॥ वासुदेवभक्तौ पूर्वाचारं प्रमाणयति भेजिरे इति॥ अथातो हेतोरग्रे पुरा विशुद्धस
त्त्वमूर्तिं भगवंतमधोक्षजं॥ अतो ये ताननुवर्तंते ते इह संसारे क्षेमाय कल्पंते॥२५॥ ननु त्वन्यानपि केचिद्भजंतो दृश्यंते॥
सत्यं मुमुक्षवस्तु सत्त्वमात्रं भजंतीति किं तु सकामा एवेत्याह॥ मुमुक्षव इति द्वाभ्यां भूतपतीनिति॥ पितृप्रजेशादीनामुपलक्ष
णं॥ अनसूयवो देवतांतरानिंदकाः संतः॥२६॥ रजस्तमसी प्रकृतिः स्वभावो येषां ते अत एव पितृभूतादिभिः समशी
लं येषां ते॥ श्रिया सहैश्वर्यप्रजाश्चेप्सन्तीति तथा ते॥२७॥ ॥ग्रास [illegible] ॥ [illegible] ॥ [illegible] ॥॥ ८

एकेनएकाग्रेणमनसाभक्तिरेवहितोधर्मः केवलंश्रमइतिप्रपंचितं॥इदानींतुभक्तेःमुक्तिफलत्वंप्रपंचयति॥५॥यस्मात्तुध्यात्रु
ध्यानेनैवासिःखड्गःतेनयुक्ताविवेकिनः॥ग्रंथिमहंकारंनिबध्नातियत्कर्मतच्छिंदंति॥तस्यकथायांरतिंप्रीतिंकोनकुर्या
त्॥१५॥तत्रसमयमेवंक्रमंनिःस्पृलिनीश्रीहरिकथायांरतिस्तत्यापितत्संप्रात्सलिनेमिपातेकिंकर्मः॥तत्राहशुश्रूषोरिति॥१
६पुण्यतीर्थनिषेवणादितिनिष्पापस्यमहत्सेवास्यात्॥ततस्तदाचन्नतद्धर्मश्रद्धाततःश्रवणेच्छाततस्तत्कथारुचिःस्यादित्यर्थः॥१६त
तःचशृण्वतामिति॥पुण्येश्रवणकीर्तनेयस्यसः।सतांसुहृत्हितकारी॥हृदियानिअभद्राणिकामादिवासनास्तानि

तस्मादेकेनमनसाभगवान्सात्वतांपतिः॥श्रोतव्यःकीर्तितव्यश्चध्येयःपूज्यश्चनित्यदा॥१४॥यदनुध्यासिनायु
क्ताःकर्मग्रंथिनिबंधनं॥छिंदंतिकोविदास्तस्यकोनकुर्यात्कथारतिं॥१५॥शुश्रूषोःश्रद्दधानस्यवासुदेव
कथारुचिः॥स्यान्महत्सेवयाविप्राःपुण्यतीर्थनिषेवणात्॥१६॥शृण्वतांस्वकथाःकृष्णःपुण्यश्रवणकीर्त
नः॥हृद्यंतःस्थोह्यभद्राणिविधुनोतिसुहृत्सतां॥१७॥नष्टप्रायेष्वभद्रेषुनित्यंभागवतसेवया॥भगवत्युत्त
मश्लोकेभक्तिर्भवतिनैष्ठिकी॥१८॥तदारजस्तमोभावाःकामलोभादयश्चये।चेतएतैरनाविद्धंस्थितंसत्त्वे
प्रसीदति॥१९॥एवंप्रसन्नमनसोभगवद्भक्तियोगतः॥भगवत्तत्त्वविज्ञानंमुक्तसंगस्यजायते॥२०॥भिद्यते
हृदयग्रंथिश्छिद्यंतेसर्वसंशयाः॥क्षीयंतेचास्यकर्माणिदृष्टएवात्मनीश्वरे॥२१॥ ॐश्रीकृष्णायनमः

सन्
अंतःस्थःहृदयस्थःछिनत्तीत्यर्थः॥१७॥ततश्चनष्टप्रायेष्विति॥सर्वाभद्रनाशस्यज्ञानोत्तरकालत्वात्॥प्रायग्रह
णंभागवतानां॥श्रीभागवतशास्त्रस्यवासेवयानैष्ठिकीनिश्चलाविक्षेपकाभावात्॥रजश्चतमश्चयेचतन्मयाभावाः
कामादयःतैरनाविद्धंअनभिभूतंप्रसीदतिउपशाम्यतिभगवद्भक्तियोगतः॥प्रसन्नमनसः॥अतएवमुक्तसंगस्यज्ञा
नफलमाह॥भिद्यतेइति॥२०॥हृदयमेवग्रंथिः॥चिज्जडग्रथनरूपोहंकारः॥अतएवसर्वसंशयाःअसंभावना
दिरूपाः कर्माण्यनारब्धफलानिक्षीयंतेआत्मनिस्वरूपभूतेईश्वरेदृष्टेएवकारेणज्ञानानंतरमेवेतिदर्शयति॥२१॥

श्री० भा० प्र० टी० ८

देवन्नररूपेणावतारलीलामाह ॥ असौ हविभूतसूक्ष्माणि इन्द्रियाणि चात्मा च मनःसहितैः स्वनिर्मितेषु चतुर्विधेषु इति भोगे।
स्थानेष्वयं योगमते ॥ तद्गुणान् तत्तदुपाधिगुणान् विषयान् भुङ्क्ते यथास्वं भोजयतीति वा तत्र चन्द्रशर्वादेश्वः ॥ पालयतीति वा तत्रात्मने पदत्मा
र्थं भुञ्जानवनेद्युतिस्मरणात ॥ ३३ ॥ इदानीं स्वकृतानां प्राप्तिप्रश्नोत्तरमाह ॥ भावयति पालयति एतेन सर्वावतारसाधारणप्रयो
जनं विशेषतः कृष्णावतारस्य कृतीरुक्तो ज्ञेयति ॥ लोकभावनः लोकरक्षतत्त्वदेवतादिषु येली लावतारः तेष्वनुरक्तः ॥ ३४ ॥ इति श्री
भावार्थदीपिकायां प्रथमस्कन्धे द्वितीयोऽध्यायः ॥ २ ॥ अवतारकथाप्रश्नोत्तरं तृतीयेन तत्राह्निधा ॥ पुरुषाद्यवताराणां तेन चत्वा।
रिंशवर्णने ॥ यदुक्तं ॥ अथाख्याहि हरेर्धीमन्नवताराणां कथाः शुभा इति तत्र तत्त्वेन नानावतारान् उक्त्वा समष्टिरूपं प्रथमं पुरुषा

असौ गुणमयैर्भावैर्भूतसूक्ष्मेंद्रियादिभिः ॥ स्वनिर्मितेषु निर्विष्टो भुंक्ते भूतेषु तद्गुणान् ॥ ३३ ॥ भावयत्येष सत्त्वे
न लोकान्वै लोकभावनः ॥ लीलावतारानुरतो देवतिर्यङ्नरादिषु ॥ ३४ ॥ इति श्रीभागवते महापुराणे प्रथमस्कं
धे द्वितीयोऽध्यायः ॥ २ ॥ ॐ सूत उवाच ॥ जगृहे पौरुषं रूपं भगवान्महदादिभिः ॥ संभूतं षोडशकलमादौ लोक
सिसृक्षया ॥ १ ॥ यस्यांभसि शयानस्य योगनिद्रां वितन्वतः ॥ नाभिह्रदांबुजादासीद्ब्रह्मा विश्वसृजां पतिः ॥ २ ॥
तस्यावयवसंस्थानैः कल्पितो लोकविस्तरः ॥ तद्वै भगवतो रूपं विशुद्धं सत्त्वमूर्जितम् ॥ ३ ॥ ॥

वतारमाह ॥ जगृहे इति पंचभिः ॥ महदादिभिर्महत्तदहंकारपंचतन्मात्रैरेकादशेंद्रियाणि पंचमहाभूतानीति षोडश
कलात्मकं प्राप्य सृष्टौ ॥ १ ॥ ननु यद्यपि भगवद्विग्रहो नैवंभूतः तथापि विराड्जीवान्तर्यामिणो भगवतो विराड्रूपेणोपासना
र्थमेवमुक्तमिति द्रष्टव्यं ॥ कोसौ भगवान्निर्मयेन्नालो योगिविशिष्टः ॥ यस्यांभसि महार्णवे शयानस्य विश्रान्तस्य तत्र च।
योगः समाधिः तद्रूपां निद्रां विस्तारयतस्तस्य नाभिरेव ह्रदः तस्मिन्नंबुजं तस्मात् ब्रह्मा आसीत् प्रभूत ॥ यामिक
स ले पौरुषं रूपं जगृहे ॥ २ ॥ कीदृशं रूपं तदाह यस्येति ॥ ननु कीदृशो विग्रहस्तस्य योंभसि शेते स्म तदाह ॥ तत्त्वस्य भगवा
तो रूपं विशुद्धं वज्रायसंमितं ॥ अतएवोर्जितं निरतिशयं सत्त्वं एतच्च योगिनां प्रत्यक्षमित्याह ॥ पश्यन्तीति ३ ॥ ८

तु

२०

मोक्षप्रदत्वाद्वासुदेवो भजनीय इत्युक्तं ॥ सर्वशास्त्रतात्पर्यगोचरत्वादपीत्याह ॥ द्वाभ्यां ॥ वासुदेवः परः तात्पर्यगोचरो येषां
ते नन्नु वेदा मखपरा इति प्रसिद्धं ते इत्याशंक्याह तेपि ॥ तदाराधनार्थत्वात्तत्परा इत्युक्तं ॥ योगा योगशास्त्राणि तेषामपि पर्यवसानं प्राणा
यामादिक्रियापरत्वेनाशंक्य तासामपि तत्परत्वमुपायार्थत्वात्तत्परत्वमुक्तं ॥ २८ ॥ ज्ञानं ज्ञानशास्त्रं नन्नु च तज्ज्ञानपरमेवेत्याशंक्य
ज्ञानस्यापि तत्परत्वमुक्तं ॥ तपो वक्ष्यते ॥ धर्मो धर्मशास्त्रं दानव्रतादिविषयं नन्नु तत्स्वर्गपरमित्याशंक्याह गम्यत इति गतिः
स्वर्गादिफलं सापि तदानंदांशरूपत्वात्तत्परैवेत्युक्तं ॥ यद्वा वेद इत्यनेनैव ॥ तन्मूलत्वात्सर्वाण्यपि वासुदेवपराणीत्यु
क्तं ॥ तत्र तेषां तत्तन्मखयोगक्रियादीनां नानाबोधपरत्वान्ननु एकपरत्वमित्याशंक्य मखादीनामपि तत्परत्वमित्युक्तमिति २९

वासुदेवपरा वेदा वासुदेवपरा मखाः ॥ वासुदेवपरा योगा वासुदेवपराः क्रियाः ॥ २८ ॥ वासुदेवपरं ज्ञानं वासु
देवपरं तपः ॥ वासुदेवपरो धर्मो वासुदेवपरा गतिः ॥ २९ ॥ स एवेदं ससर्जाग्रे भगवानात्ममायया ॥ सदसद्रूप
या चासौ गुणमय्या गुणो विभुः ॥ ३० ॥ तया विलसितेष्वेषु गुणेषु गुणवानिव ॥ अंतःप्रविष्ट आभाति विज्ञा
नेन विजृंभितः ॥ ३१ ॥ यथा ह्यवहितो वह्निर्दारुष्वेकः स्वयोनिषु ॥ नानेव भाति विश्वात्मा भूतेषु च तथा पुमान् ॥ ३२

यं ॥ २९ ॥ ननु जगत्सर्गप्रवेशनियमनादिविलासयुक्तेव वस्तु निर्गुणं सर्वशास्त्रसमन्वयो दृश्यते ॥ कथं वासुदेवप
रत्वं सर्वस्य माह स एवेति चतसृभिः ॥ एतेन वेदवाक्यैः कस्य कर्मणां दावात्मा कूटस्थ इति प्रश्नस्योत्तरं सदसद्रूपया कार्यका
रणात्मिकया गुणमय्या असौ स्वयं तु अगुणो निर्गुणोपि सृष्टवानित्यर्थः ॥ भगवतो जगत्कारणत्वमुक्तं प्रवेशनियमनलक्षणां ली
लामाह ॥ तयेति ॥ ३० ॥ विलसितेषूद्भूतेषु गुणेष्वाकाशादिषु ततः प्रविष्टः सन् गुणवानिव सदृश्यमानोपि गुणास्पृष्ट इत्यभिमा
न वा भिवन्नत्व वस्तुतत्त्वापायतो विज्ञानेन चिच्छक्त्या विजृंभितोऽभिव्यञ्जितः ॥ बहुरूपत्वलीलामाह यथेति ॥ ३१ ॥ स्वयो
निषु स्वाभिव्यञ्जकेषु अवहितो निहितः ॥ विश्वात्मा पुमानेकोप्येवं सर्वभूतेषु प्राणिषु वर्तमानोपि प्रतियोनि नाना
त्वेन भानान्नानेव भाति ॥ ३२ ॥ ॥ ॥ राम ॥ ॥

ले

श्री

बीजं उद्भवस्थानं

अदभ्रं प्रचुरं ज्ञानात्मकं यच्चक्षुस्तेन महत्स्वरूपमपरिमितानि यानि पादादीनि तैरद्भुतं सहस्रं मूर्धादयो यस्मिंस्तत् ॥ सहस्रं या
नि मौल्यादीनि उल्लसत् शोभमाने ॥ एतत्तु कूटस्थं नानावतारवदाविर्भावनिधिभाववदित्याह ॥४॥ एतदादिनारायण
रूपं निधीयतेऽस्मिन्निति निधानं कार्यावसाने प्रवेशस्थानमित्यर्थः ॥ बीजत्वे पि तावद्बीजत्वं किंतु व्ययेन केवलम
वताराणामेव बीजं किंतु सर्वप्राणिनामित्याह ॥ यस्यांशो ब्रह्मा तस्यांशो मरीच्यादिः तैर्नैसनत्कुमाराद्यवतारं तत्र
वितेवाह स एवेति ॥५॥ कौमारस्यार्थः ॥ ब्राह्मणो मानवः ॥ इत्यादीनि सर्गविशेषणानामानियः पौरुषेयरूपं जगुह्ये ॥ सप।

पश्यंत्यदोरूपमदभ्रचक्षुषा सहस्रपादोरुभुजाननाद्भुतम् ॥ सहस्रमूर्धश्रवणाक्षिनासिकं सहस्रमौल्यं
बरकुंडलोल्लसत् ॥४॥ एतन्नानावताराणां निधानं बीजमव्ययम् ॥ यस्यांशांशेन सृज्यंते देवतिर्यङ्नरादयः ॥५॥
स एव प्रथमं देवः कौमारं सर्गमाश्रितः ॥ चचार दुश्चरं ब्रह्मा ब्रह्मचर्यमखंडितम् ॥६॥ द्वितीयं तु भवायास्य
रसातलगतां महीम् ॥ उद्धरिष्यन्नुपादत्त यज्ञेशः सौकरं वपुः ॥७॥ तृतीयमृषिसर्गं वै देवर्षित्वमुपे
त्य सः ॥ तंत्रं सात्वतमाचष्ट नैष्कर्म्यं कर्मणां यतः ॥८॥ तुर्ये धर्मकलासर्गे नरनारायणावृषी ॥ भूत्वात्मोप
शमोपेतमकरोत् दुश्चरं तपः ॥९॥ ॥

देवः कौमारं सर्गमाश्रितः सनत्कुमाराख्यो ब्राह्मणो भूत्वा ब्रह्मचर्यं चचार ॥६॥ प्रथममद्वितीयादिशब्दानिर्देशमात्रा
पेक्षया ॥ अस्य विश्वस्य भवायोद्भवाय महीमुद्धरिष्यन्निति कर्मोक्तिः ॥ एवं सर्वत्रावतारस्तत्कर्म चोक्तमित्यनुसंधेयं ॥
नारदावतारमाह तृतीयमिति ॥७॥ ऋषिसर्गमाश्रित्य तत्र देवर्षित्वमुपेत्येत्यर्थः सात्वतं वैष्णवं तंत्रं पंचरात्रागममाचष्ट
कवान् ॥ यतस्तंत्रान्निर्वर्तितकर्मबंधहेतुत्वं येभ्यस्तानि कर्माणि तेषां भावो नैष्कर्म्यं कर्मणामेव मोचकत्वं यतो भवतित
दाचष्टेत्यर्थः ॥८॥ तुर्ये चतुर्थे धर्मस्यांशः कला भार्या सर्गः ॥ धर्मविवाहस्त्रीत्वमनेनायमवतीर्ण इति ॥ तस्याः सर्वेष्टषिभूत्वा

इत्येकावतारान्दर्शयति कपिलावतारमाह पंचमइति ॥९॥ मम

श्री॰ भाग॰ टी॰ ५

आसुरयेतन्नाम्नेब्राह्मणायतत्त्वानांग्रामस्समूहस्तस्यनिर्णयोयस्मिंस्तत्सांख्यं॥ दत्तात्रेयावतारमाहषष्ठइति॥१०॥ अत्रेरपत्यत्वंवृते
नैववृतःसन्प्राप्तः॥ अत्रेरपत्यमभिकांक्षतआह॥ तुष्टइति॥ वरदानात्तातांकषेप्राप्तोनसूयया॥ मत्समेदत्तापत्यमिच्छेतामा
मेवापुमर्पितवानितिदोषवृष्णिमुक्तार्णवत्रिमर्षः॥ आन्वीक्षिकीमात्मविद्यांप्रल्हादादिभ्यउक्तवान्॥११॥ यज्ञावतारमाह॥ ततइति॥
सयज्ञोयामाद्यैःस्वैरेवपुत्रायामानामकैर्देवैःसहस्वायंभुवमन्वन्तरमपालयत्॥ नाभेर्मेरुदेव्यांऋषभोमूर्दिसर्गः २२
ऋषभावतारमाह॥ अष्टमइति॥ सर्वाश्रमनमस्कृतंसर्वाश्रमपरमहंसपथंमार्गंधीराणांदर्शयन्नाभेराग्नीध्रपुत्रात्ऋषभोजातः

पंचमःकपिलोनामसिद्धेशःकालविप्लुतं॥ प्रोवाचासुरयेसांख्यंतत्त्वग्रामविनिर्णयं॥१०॥ षष्ठमत्रेरपत्यत्वंवृ
तःप्राप्तोनसूयया॥ आन्वीक्षिकीमलर्कायप्रल्हादादिभ्यऊचिवान्॥११॥ ततःसप्तमआकूत्यांरुचेर्यज्ञोभ्यजा
यत॥ सयामाद्यैःसुरगणैरपात्स्वायंभुवांतरं॥१२॥ अष्टमेमेरुदेव्यांतुनाभेर्जातउरुक्रमः॥ दर्शयन्वर्त्मधीः
राणांसर्वाश्रमनमस्कृतम्॥१३॥ ऋषिभिर्याचितोभेजेनवमंपार्थिवंवपुः॥ दुग्धेमामोषधीर्विप्रास्तेना
यंसउशत्तमः॥१४॥ रूपंसजगृहेमात्स्यंचाक्षुषोदधिसंप्लवे॥ नाव्यारोप्यमहीमय्यामपाद्वैवस्वतंमनुं॥१५
सुरासुराणामुदधिंमथ्नतांमंदराचलम्॥ दध्रेकमठरूपेणपृष्ठएकादशेविभुः॥१६॥ ॥ रामजयी

पार्थिवंवपुःराजदेहंपृथुरूपंप्राप्तोनवेदृष्ट्योविदंपार्थिवंतेऔषधीरिमुपलब्ध्वानां॥ इमांपृथिवींसर्वाणिवस्तूनिदुग्धवान्यत्र
उशत्तमाभावःप्रार्थ्यः॥ हेविप्रास्तेनपृथ्वीदोहनेनसोयमवतारउशत्तमः कमनीयतमः॥ वशकांतौविस्पस्मात्॥१४॥ म
त्स्यावतारमाहरूपमिति॥ चाक्षुषमन्वंतरेयउदधिसंप्लवःतस्मिन्यद्यपिमन्वंतरावसानेप्रलयोनास्तितथापिकेनचि
त्कौतुकेनसत्यव्रतायमायादर्शिता॥ यथाकांडेमार्कंडेयायेतिद्रष्टव्यं॥ महीमय्यांनाविक्षोणिरूपायांमस्यामित्यर्थः
अपादरक्षत्॥ वैवस्वतमितिभाविनीसंज्ञा॥१५॥ कूर्मावतारमाहसुरेति॥ कमठः कूर्मःतद्रूपेणएकादशोवतारोवि

धान्वंतरावतारमाह ॥ धान्वंतरमिति ॥ धान्वंतरं धन्वंतरिरूपं द्वादशमादिप्रयोगः ल्यबर्थः ॥ त्रयोदशमेव रूपं तच्चरितेन सह दर्श
यति ॥ अपाययदिति ॥ सुरानपाययत् अमृतमिति शेषः ॥ मोहिन्या स्त्रिया अन्यानसुरान्मोहयन् ॥ धान्वंतरविरूपेणामृतमानीय मोहि
न्यापाययदित्यर्थः ॥१७॥ नृसिंहावतारमाह चतुर्दशमिति ॥ नारसिंहं स्वरूपं बिभ्रत् ॥ एरकां निर्ग्रंथितृणं ॥१८॥ वामनाव
तारमाह पंचदशमिति ॥ वामनं ॥ वामयतीति वामनं रूपं स्वल्पप्रत्यादित्सुः ॥ तस्मादाच्छिद्य गृहीतुमिच्छुः ॥१९॥ परशु
रामावतारमाह ॥ अवतार इति त्रिः त्रिगुणं यथा भवति तथा सप्तकृत्वः ॥ सप्तवारानेकविंशतिवारा इत्यर्थः ॥२०॥ व्यासाव

धान्वंतरं द्वादशमं त्रयोदशममेव च ॥ अपाययत्सुरानन्यान्मोहिन्या मोहयन् स्त्रिया ॥१७॥ चतुर्दशं नारसिंहं बिभ्रद्दै
त्येंद्रमूर्जितं ॥ ददार करजैरूरावेरकां कटकृद्यथा ॥१८॥ पंचदशं वामनकं कृत्वागादध्वरं बलेः ॥ पदत्रयं याचमानः
प्रत्यादित्सुस्त्रिविष्टपम् ॥१९॥ अवतारे षोडशमे पश्यन्ब्रह्मद्रुहो नृपान् ॥ त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरो
न्महीं ॥२०॥ ततः सप्तदशे जातः सत्यवत्यां पराशरात् ॥ चक्रे वेदतरोः शाखा दृष्ट्वा पुंसोल्पमेधसः ॥२१॥ नरदे
वत्वमापन्नः सुरकार्यचिकीर्षया ॥ समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम् ॥२२॥ एकोनविंशे विंशति
मे वृष्णिषु प्राप्य जन्मनी ॥ रामकृष्णाविति भुवो भगवानहरद्भरम् ॥२३॥ ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषां
बुद्धो नाम्नांजनसुतः कीकटेषु भविष्यति ॥२४॥ अथासौ युगसंध्यायां दस्युप्रायेषु राजसु ॥ जनिता विष्णुयश
सो नाम्ना कल्किर्जगत्पतिः ॥२५॥ ॥

तारमाह ततः इति ॥ अल्पमेधसः अल्पबुद्धीन् पुंसो दृष्ट्वा तदनुग्रहार्थं शाखाश्चक्रे ॥२१॥ रामावतारमाह ॥ नरदेवत्वं राघवरूपे
णाप्राप्तः सन् ॥२२॥ अतः परमष्टादशं रामकृष्णावतारमाह विंशतिमं इति क्वचित् तकारलोपः छंदोनुरोधेन रामकृष्णा
विति एवं जन्मनी प्राप्य ॥२३॥ अंजनस्य सुतः जिनसुत इति पाठे जिनः स एव कीकटमध्ये गयाप्रदेशे ॥२४॥ कल्क्यवतारमाह
युगसंध्यायां कलेरंते विष्णुयशो नाम्नो ब्राह्मणात् कल्की नाम जनिष्यते अत्र क्रमसर्वसंग्रहार्थमाह ॥ अवतारा इति ॥२५॥ ॥

राम ॥ राम ॥ राम ॥ ॥ राम ॥ राम

असंख्येयत्वे दृष्टान्तः यथेति अविदासिनः उपक्षयशून्यात् देशादुत्पत्तये इत्यस्मात् ॥ सरसः सकाशात् कुल्याः ॥ लघुप्रवाहाः वि
भूतीरादृश्य इति ॥२६॥ तत्र च विशेषमाह ॥ एते चेति ॥२७॥ पुंसः परमेश्वरस्य केचिदंशाः केचित्कलाविभूतयश्च त
त्र मत्स्यादीनामवतारत्वेन सर्वज्ञत्वसर्वशक्तिमत्त्वेपि यथोपयोगमेव ज्ञानक्रियाशक्त्याविष्करणं ॥ कुमारनारदादिषु पि
कारिकेषु यथोपयोगमेश कलावेशः ॥ पृथ्वादिषु शक्त्यावेशः ॥ कृष्णस्तु भगवान्नारायण एव आविर्भूतसर्वशक्ति
त्वात् सर्वेषां प्रयोजनमाह ॥ इन्द्रारयो दैत्यास्तैर्व्याकुलम् उपद्रुतं लोकं मृडयंति सुखिनं कुर्वंति ॥ एतत्कीर्तनफलमाह जन्मे

अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः ॥ यथाविदासिनः कुल्याः सरसः स्युः सहस्रशः ॥२६॥ ऋषयो मनवो दे
वा मनुपुत्रा महौजसः ॥ कलाः सर्वे हरेरेव सप्रजापतयस्तथा ॥२७॥ एते चांशकलाः पुंसः कृष्णस्तु भगवान्स्व
यं ॥ इन्द्रारिव्याकुलं लोकं मृडयंति युगे युगे ॥२८॥ जन्म गुह्यं भगवतो य एतत्प्रयतो नरः ॥ सायं प्रातर्गृणन्भ
क्त्या दुःखग्रामाद्विमुच्यते ॥२९॥ एतद्रूपं भगवतो ह्यरूपस्य चिदात्मनः ॥ मायागुणैर्विरचितं महदादिभि
रात्मनि ॥३०॥ यथा नभसि मेघौघो रेणुर्वा पार्थिवोऽनिले ॥ तथा द्रष्टरि दृश्यत्वमारोपितमबुद्धिभिः ॥३१

ति ॥२८॥ गुह्यमतिरहस्यं जन्म प्रयतः शुचिः सन् दुःखग्रामात्संसारात् मुच्यते इत्युक्तं तत्कथं देहद्वयसंबंधे सति तद्वि
मुक्तिः विना ज्ञानं न देहसंबंधश्च भगवत्प्रायोत्पाविद्याविलसितत्वादेतज्जन्मवर्णनादिजनितविद्ययात विनिवृत्तिरुपपा
द्यते इत्याशयेनाह ॥ एतदिति पंचभिः ॥३०॥ अरूपस्य चिदेकरसस्यात्मनो जीवस्यैतत्स्थूलरूपं शरीरं भगवतो या सा
यातस्याः गुणैर्महदादिभिर्विरचितं आत्मनि [illegible] आरोपितमिति अर्थः ॥३१॥ कथमिव यत्तायां स्वरूपावगतो
न तद्यथा [illegible] मित्याह ॥ यथा वा [illegible] आरोपितः ॥ यथा वा पार्थिवो रे
णुरनिले [illegible] ॥ एवं द्रष्टर्यात्मनि दृश्यत्वं [illegible] आरोपितमित्यर्थः ॥ किंच ॥३१॥ तद् ॥

अकर्त्तुः कर्माणि अजनस्य जन्मानि हृत्पतेरिंद्रियाणां नियंतुः ॥ नहि जीववदीश्वरस्य बंधो विशेषः ॥ स्वातंत्र्यमेव विशेषमाह स वा इति ३५
षाड्वर्गिकं इंद्रियषट्कवर्गविषयं जिघ्रति देवं गंधवद्गृह्णाति ॥ न तत्र बद्ध्यते इत्यर्थः ॥ अतः षड्गुणेशः षडिंद्रियनियंता ३६
ननु किमीश्वरस्य सृष्ट्यादिकर्मभिर्विषयभोगो वा न स्यात् ॥ न वेति ॥ धातुर्जगद्विधातुर्वीर्यस्य ऊतीर्जगल्लीलाः कुमनीषः
कुबुद्धिर्निपुणेन तर्कादिकौशलेन नावैति जानाति मनसा रूपाणि वचसा नामानि ॥ संतन्वतो विस्तारयतो वचोभिर्विति
वक्तृत्वं च स्पृशमभिप्रायेणामनो वचोभिः संकेतितवानज्ञः तु किं विजानातीत्याह ॥ स वेदेति ॥ ३७ ॥ अमायया अकुटिलभा

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ॥ वर्णयंति स्म कवयो वेदगुह्यानि हृत्पतेः ॥ ३५ ॥ स वा इदं विश्वममोघली-
लः सृजत्यवत्यत्ति न सज्जतेस्मिन् ॥ भूतेषु चांतर्हित आत्मतंत्रः षाड्वर्गिकं जिघ्रति षड्गुणेशः ॥ ३६ ॥ न चास्य क-
श्चिन्निपुणेन धातुरवैति जंतुः कुमनीष ऊतीः ॥ नामानि रूपाणि मनोवचोभिः संतन्वतो नटचर्यामिवाज्ञः ॥ ३७
स वेद धातुः पदवीं परस्य दुरंतवीर्यस्य रथांगपाणेः ॥ योमायया संततयानुवृत्त्या भजेत तत्पादसरोजगंधं ॥ ३८
अथेह धन्या भगवंत इत्थं यद्वासुदेवेखिललोकनाथे ॥ कुर्वंति सर्वात्मकमात्मभावं न यत्र भूयः परिवर्त उ-
ग्रः ॥ ३९ ॥ इदं भागवतं नाम पुराणं ब्रह्मसंमितं ॥ उत्तमश्लोकचरितं चकार भगवानृषिः ॥ ४० ॥ निःश्रेयसाय
लोकस्य धन्यं स्वस्त्ययनं महत् ॥ तदिदं ग्राहयामास सुतमात्मविदां वरम् ॥ ४१ ॥ सर्ववेदेतिहासानां सारं
सारं समुद्धृतं ॥ स तु संश्रावयामास महाराजं परीक्षितम् ॥ ४२ ॥ ॥

वेन संततया निरंतरया अनुवृत्त्या अनुकूलेन भजेत ॥ भक्तिमार्गेण प्रवृत्तानृषीनभिनंदति ॥ अथेति ॥ ३८ ॥ यतो भक्ता एवं
भगवत्तत्त्वं जानाति ॥ अथातो भगवंतः सर्वज्ञाः भवंतो धन्याः कृतार्थाः ॥ कुतः यद्यस्मात् ॥ इत्थं ईदृशं वर्तमाना वासुदेवे आ-
त्मभावं मनोवृत्तिं कुर्वंति सर्वात्मकमैकांतिकं ॥ यस्मिन्यत्र भावे सति भूयः परिवर्तो जन्ममरणाद्यावर्तो न भवति ॥ एतत्
किमेतत्काव्यं स्यात् पूर्वं कथयसीत्याह ॥ इदमिति ॥ ३९ ॥ ब्रह्मसंमितं सर्ववेदतुल्यं उत्तमश्लोकचरितं यस्मिंस्तत् ऋषि-
भिर्व्यासः ॥ तृप्तिप्रदायकत्वमाह ॥ तदिदमिति ॥ ४० ॥ सुतं शुकम् ॥ ४१ ॥ ४२ ॥ ॥ राम ॥ ~ ॥

अतः स्थूलाद्रूपात्परमन्यदपि रूपमारोपितमित्युपवर्णः॥ कथंभूतं तत्॥ यदव्यक्तं सत्त्वं तत्र हेतुः॥ अव्यूढगुणबृंहितं अव्यूढाः क
रचरणादिपरिणामः॥ तथा अपरिणतगुणकार्यैर्बृंहितं रचितं॥ आकारविशेषरहितत्वादव्यक्तमित्यर्थः॥ एतदे
व व्यक्तं तस्मात्॥ अदृष्टाश्रुतवस्तुत्वात्॥ आकारविशेषवद्वस्तुभावात्॥ यच्चाकारविशेषवद्वस्तु तद्घटादिवद्दृश्यते श्रूय
ते वा॥ इदं तु न तथा तर्हि तस्य सत्त्वे किं प्रमाणं तत्राह॥ स जीवो जीवोपाधिः॥ जीवो जीवेन निर्मुक्तः॥ जीवो जीवं विहाये
मादौ जीवोपाधेर्लिङ्गदेहे जीवशब्दप्रयोगात्॥ जीवोपाधिं तथाकल्पनं तदर्थः॥ ननु स्थूलस्यैव भोगायतनत्वाज्जीवोपाधि
रस्ति किमनया कल्पनयेत्यत आह॥ यद्यस्मात्तत्सत्त्वात्पुनर्भवः॥ पुनर्जन्मलोकान्तरगमनादीनां तेन विनासंभवादिति भावः॥ त
देवं जीवस्य बन्धसन्तानमाह॥ स॥ यत्र यदेमे स्थूलसूक्ष्मे द्वे रूपे स्वसंविदा स्वस्वरूपसम्यग्ज्ञानेन प्रतिषिद्धे भवतः ज्ञानेन प्रतिषिद्धा

26

अतः परं यदव्यक्तमव्यूढगुणबृंहितं॥ अदृष्टाश्रुतवस्तुत्वात्स जीवो यत्पुनर्भवः॥ ३२॥ यत्रेमे सदसद्रूपे प्रतिषि
द्धे स्वसंविदा॥ अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनम्॥ ३३॥ यद्येषोपरता देवी माया वैशारदी मतिः॥ संप
न्न एवेति विदुर्महिम्नि स्वे महीयते॥ ३४॥

ह्निनतमेव हेतुमाह॥ अविद्ययात्मनि कृते कल्पिते इति हेतोः तद्ब्रह्म तदा जीवो ब्रह्मैव भवतीत्यर्थः॥ कथंभूतं दर्शनं॥
ज्ञानैकस्वरूपं तथापि भवबन्धमायायाः संसृतिकारणभूताया अविद्यमानत्वात्कथं ब्रह्मतेत्याह यदीति॥ ३४॥ असंदेहे से
देहे च वचनं यदि वेदाः प्रमाणं स्मृतिनिबन्धे वैशारदी॥ विशारदः॥ सर्वज्ञ ईश्वरः॥ तदीया देवी संसारचक्रक्रीडनी एषा मा
या यद्युपरता भवति॥ किं निमित्तोपरता भवेत्॥ तत्राह मतिर्विद्या॥ अयं भावः यावदविद्यात्मना आवरणविक्षेपौ करोति॥ तावन्नोप
रमति॥ नोपसंहरतीति यावत्॥ यदा तु सैव विद्यारूपेण परिणता॥ तदा सदसद्रूपं जीवोपाधिं दग्ध्वा निरिन्धनाग्निवत्स्वय
मेवोपरमेदिति॥ तदा संपन्नो ब्रह्मस्वरूपं प्राप्तस्तेनेति विद्वांसस्तत्त्वज्ञाः॥ किमतो यद्येवं स्वे महिम्नि परमानन्दस्वरूपे महीयते स्वा
मते विराजत इत्यर्थः॥ यथा जीवस्य जन्मादि मायापरमेश्वरस्यापि जन्मकर्मादि मायिकमाह॥ एवमिति॥ ३४॥ रामजी॥

श्री॰ भाग॰ टी॰ ८

एवंभूतोसौ कथमालक्षितो ज्ञातः कुरुजांगलान्देशविशेषान् संप्राप्तः प्रथमं ततो गजसाह्वये विचरन् केन सहितः।
साह्वयो नाम यस्य तस्मिन् हस्तिनापुरे हस्ती नाम राजा तेन निर्मितत्वात्॥६॥ एवंभूतेन मुनिना सह यत्र संवादे एषा सात्वती भा-
गवती श्रुतिः संहिता [illegible] इति॥७॥ गोदोहनमात्र-
कालं प्रतीक्षते तदपि न निमित्तार्थं किंतु तेषामाश्रमं गृहं तीर्थीकुर्वन्॥ तस्मादेवंभूतेन [illegible] तत्सत्त्वरितमतीवाश्च-
र्यं ततो नः कथयेत्याह अभिमन्युसुतमिति॥८॥ गृणीहि कथय॥९॥ स सम्राडिति द्वाभ्यां चक्रवर्तीवेति वितर्के कस्य वा हेतोः कस्मात्

सुतमिति

कथमालक्षितः पौरैः संप्राप्तः कुरुजांगलान्॥ उन्मत्तमूकजडवद्विचरन् गजसाह्वये॥६॥ कथं वा पांडवेयस्य रा-
जर्षेर्मुनिना सह॥ संवादः समभूत्तात यत्रैषा सात्वती श्रुतिः॥७॥ स गोदोहनमात्रं हि गृहेषु गृहमेधिनाम्॥ अवेक्ष-
ते महाभागस्तीर्थीकुर्वंस्तदाश्रमम्॥८॥ अभिमन्युसुतं सूत प्राहुर्भागवतोत्तमम्॥ तस्य जन्म महाश्चर्यं कर्माणि च
गृणीहि नः॥९॥ स सम्राट् कस्य वा हेतोः पांडूनां मानवर्धनः॥ प्रायोपविष्टो गंगायामनादृत्याधिराट्श्रियम्॥१०॥
नमंति यत्पादनिकेतमात्मनः शिवाय हानीय धनानि शत्रवः॥ कथं स वीरः श्रियमंग दुस्त्यजां युवैषतोत्स्रष्टु-
महो सहासुभिः॥११॥ शिवाय लोकस्य भवाय भूतये य उत्तमश्लोकपरायणा जनाः॥ जीवंति नात्मार्थमसौ
पराश्रयं मुमोच निर्विद्य कुतः कलेवरम्॥१२॥ तत्सर्वं नः समाचक्ष्व पृष्टो यदिह किंचन॥ मन्ये त्वां विषये वाचां स्नात-
मन्यत्र छांदसात्॥१३॥ ॥

रणात्तद्युधिराट्श्रियं श्रियं राज्ञां श्रियं संपदमनादृत्य॥१०॥ यस्य पादनिकेतं चरणपीठं।
[illegible] नमंति॥ अंग हे सूत युवा [illegible] एषत इच्छत आर्षमात्मनेपदम् असुभिः प्राणैः सह।
विरक्तस्य किं धनादिभिरिति चेत्तत्राह॥११॥ लोकस्य शिवाय सुखाय भवाय अभ्युदयाय भूतये समृद्धये ऐश्वर्याय च ते जीवं[illegible]
[illegible]ति न त्वात्मार्थं॥ एवं सति असौ राजा निर्विद्य विरज्य अपि परेषामाश्रयं कलेवरं कुतो हेतोर्मुमोच॥ न हि परोपजी-
विनं स्वयं मर्तुमुचितमित्यर्थः॥१२॥ यत्किंचनेह पृष्टोसि तत्सर्वमस्माकं समाचक्ष्व यस्माद्वाचां विषये अर्थे स्नातं पारंगतं
त्वां मन्ये छांदसाद्वेदादन्यत्र [illegible] कलियुगे इत्यादिप्रश्नानां व्यासजन्मकथनपूर्वकमुत्तर-

प्रायेण सत्त्वपर्यन्तानां शक्ते नोपविष्टमिति वैराग्योक्तिः ॥ ४२ ॥ हे विप्रा विप्रर्षेः सकाशात् ॥ ४४ ॥ अध्ययनं सम्यक् तवानस्मि तत्र
कीर्तयतस्तत्र च निविष्टः वेयमन्यमेदान्तत्र पदाहृतिरदोषः ॥ यथाधीतं न तु स्वमतिविलसितं ॥ तत्र तत्र यथामति ॥ मम यदनुसारे
ण संक्षेपतः कथितं विस्तरतः श्रावयिष्यामि ॥ ४५ ॥ इति श्रीभावार्थदीपिकायां प्रथमस्कन्धे तृतीयः ॥ ३ ॥ तुर्ये भारावतारे भ
कारणात्वेन वार्यन्ते व्यासस्य पूर्वितोषस्तत्तपः श्रवणं नारदादिभिः ॥ इमं वंशं सत्यं तया श्रावयिष्यामीति ब्रुवाणं मुनीनां बह्वृचानां
मध्ये एके नवकृत्वो वृद्धः वृद्धस्य पिवकृत्यः कुलपतिरम्बुतस्य ॥ तेषां पिवकृत्यः पाठो बहुव ॥ अन्ये ददीति नवकृत्वो ॥ अतएव
बह्वृचत्वात् शौनकोऽब्रवीत् ॥ १ ॥ यदा कथामाह ॥ २ ॥ कस्मिन्स्थाने केन हेतुना निमित्तेन महाभारतादिसर्वशास्त्राणि कृतवत

प्रायोपविष्टं गंगायां परीतं परमर्षिभिः ॥ कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ॥ ४३ ॥ कलौ नष्टदृशामेष
पुराणार्कोऽधुनोदितः ॥ तत्र कीर्तयतो विप्रा विप्रर्षेर्भूरितेजसः ॥ ४४ ॥ अहं चाध्यगमं तत्र निविष्टस्तदनुग्रहात् ॥ सो
हं वः श्रावयिष्यामि यथाधीतं यथामति ॥ ४५ ॥ इति भागवते प्रथमस्कन्धे तृतीयोऽध्यायः ॥ ३ ॥ व्यास उवाच ॥ इति
ब्रुवाणं संस्तूय मुनीनां दीर्घसत्रिणां ॥ वृद्धः कुलपतिः सूतं बह्वृचः शौनकोऽब्रवीत् ॥ १ ॥ शौनक उवाच ॥ सूत सूत
महाभाग वद नो वदतां वर ॥ कथां भागवतीं पुण्यां यदाह भगवाञ्छुकः ॥ २ ॥ कस्मिन्युगे प्रवृत्तेयं स्थाने वा के
न हेतुना ॥ कुतः संचोदितः कृष्णः कृतवान्संहितां मुनिः ॥ ३ ॥ तस्य पुत्रो महायोगी समदृङ्निर्विकल्पकः ॥ ए
कान्तमतिरुन्निद्रो गूढो मूढ इवेयते ॥ ४ ॥ दृष्ट्वानुयान्तमृषिमात्मजमप्यनग्नं देव्यो ह्रिया परिदधुर्न सुतस्य चित्रं तत्

तोऽपुत्रे रेतन्नोहितान् करणं किं कारणं इत्यर्थः ॥ कृत इति सार्वविभक्तिकस्तसिः केन प्रवृत्तितः इत्यर्थः ॥ कृष्णो व्यासः यद्यपि
सततं श्रावयामासेति तत ॥ शुकस्य व्याख्यानादिकं कथं च्युतिमिति प्रष्टुं तस्य ॥ अमेयोदासीनता ॥ आह महायोगी तस्य
समदृक् सर्वं ब्रह्मेति पश्यति ॥ अतो निर्विकल्पकः ॥ स्वार्थकः निरस्तभेदः ॥ किंचैकस्मिन्मनः सम्यक्सिद्धिः सा एवंभूता मतिर्य
स्य सः ॥ यतः उन्निद्रः मायाशयनात् उद्बुद्धः ॥ या निशा सर्वभूतानां तस्यां जागर्ति संयमीति स्मृतेः ॥ अतएव गूढः ॥ एकतो मू
ढ इव प्रतीयते ॥ निर्विकल्पत्वे प्रपंचयति ॥ दृष्ट्वेति ॥ ५ ॥ आत्मजं शुकमप्यनग्नं तेऽनुयान्तमनुव्रजन्तं व्यासं दृष्ट्वा गंगायां स्नानमपि
दृष्ट्वा जलक्रीडां सोदेव्यो अप्सरसो ह्रिया लज्जया वासांसि परिदधुः पर्यधानन्तत्र विस्मयः ॥ अनग्नमपि नग्नं नार्याश्लिष्टतेन पुत्र स्वं कृतं नग्नं सम्प्रवृत्तो

२८

द्वापरे समनुप्राप्ते एकदेशे प्राप्ते सति तृतीये युगपर्यये परिवर्ते॥ वासव्यां उपरिचरवसोः वीर्याज्जातायां सत्यवत्यां योगी ज्ञानी व्यासो जातः॥१४॥ जलमुपस्पृश्य जले स्नानादिकं कृत्वेत्यर्थः॥ आसीनो बभूवेति शेषः॥ विविक्तदेशे इत्यादि विशेषैकाग्रार्थमुक्तं॥ अनेनैव बदरिकाश्रमस्थानं सूचितं॥१५॥ तत्र स ऋषिर्युगधर्मादिव्यतिकरं वीक्ष्य सर्ववर्णाश्रमाणां यद्धितं तद्दध्याविति तृतीयेनान्वयः॥ परावरज्ञः अतीतानागतवित्॥ अव्यक्तं रंहो वेगो यस्य तेन कालेन युगधर्माणां व्यति-

सूत उवाच॥ द्वापरे समनुप्राप्ते तृतीये युगपर्यये॥ जातः पराशराद्योगी वासव्यां कलया हरेः॥१४॥ स कदाचि-
त्सरस्वत्या उपस्पृश्य जलं शुचिः॥ विविक्त एक आसीन उदिते रविमंडले॥१५॥ परावरज्ञः स ऋषिः कालेनाव्य-
क्तरंहसा॥ युगधर्मव्यतिकरं प्राप्तं भुवि युगे युगे॥१६॥ भौतिकानां च भावानां शक्तिह्रासं च तत्कृतं॥ अश्रद्द-
धानान्निःसत्त्वान्दुर्मेधान्ह्रसितायुषः॥१७॥ दुर्भगांश्च जनान्वीक्ष्य मुनिर्दिव्येन चक्षुषा॥ सर्ववर्णाश्रमाणां यद्द-
ध्यौ हितममोघदृक्॥१८॥ चातुर्होत्रं कर्म शुद्धं प्रजानां वीक्ष्य वैदिकं॥ व्यदधाद्यज्ञसंतत्यै वेदमेकं चतु-
र्विधं॥१९॥ ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः॥ इतिहासः पुराणं च पंचमो वेद उच्यते॥२०॥
तत्रर्ग्वेदधरः पैलः सामगो जैमिनिः कविः॥ वैशंपायन एवैको निष्णातो यजुषामुत॥२१॥ अथर्वांगिर-
सामासीत्सुमंतुर्दारुणो मुनिः॥ इतिहासपुराणानां पिता मे रोमहर्षणः॥२२॥ त एत ऋषयो वेदं स्वं स्वं व्य-
स्यन्ननेकधा॥ शिष्यैः प्रशिष्यैस्तच्छिष्यैर्वेदास्ते शाखिनोऽभवन्॥२३॥ त एव वेदा दुर्मेधैर्धार्यंते पुरुषैर्यथा
एवं चकार भगवान्व्यासः कृपणवत्सलः॥२४॥

करं संकरं प्राप्तं वीक्ष्येत्यन्वयः भुवि युगे युगे॥१६॥ भौतिकानां शरीरादीनां तत्कृतं कालकृतं निःसत्त्वान् धैर्यशून्यान् दु-
र्मेधान् मन्दमतीन्॥१७॥ तत्सूचितं होत्रोपलक्षिताः॥ चत्वार ऋत्विजः होता अध्वर्युः उद्गाता ब्रह्मा इत्येवं यस्मिन् तच्चातुर्होत्रं शुद्धं शुद्धिकरं
यज्ञसंतत्यै यज्ञानामविच्छेदाय चतुर्विधमेवाहरदिति॥१९॥ उद्धृताः पृथक्कृताः॥२०॥ दारुणः अथर्वांगिरसां अभिचा-
रादिप्रवृत्तेः॥२२॥ व्यस्यन् विभक्तवन्तः वेदविभागप्रयोजनमाह त एवेति॥२३॥ येन दुर्मेधैरपि यथा विभागेन धार्यंते तथा एव॥२४॥

श्री० भाप्र० टी० १

किंच द्विजबंधवः त्रैवर्णिकेष्वधमाः तेषां कर्मश्रेयसि श्रेयःसाधने एवं भवेत् ॥२५॥ अत एव तेषां कृपया मुनिना भार-
ताख्यानं कृतं ॥ अनेनैव प्रकारेण भवति निभूतानां श्रेयसि हिते ॥२६॥ सर्वात्मकेनापि कर्मणा नातिप्रसीदद्धृदयं यस्य सः
चिन्ताप्रसन्नो हेतुं वितर्कयन्निदमुवाच स्वगतं ॥२७॥ मानिताः पूजिताः गृहीतमनुशासनमाज्ञा ॥२८॥ देह्यो देहमध्यवर्त्यात्मा जी-
वो वस्तुतो विभुः ॥ परिपूर्णोऽप्यात्मना स्वेन तु असंपन्न इवाभाति ब्रह्मवर्चसेषु वृत्तपालनतयोत्कर्ष

स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा ॥ कर्मश्रेयसि मूढानां श्रेय एवं भवेदिह ॥२५॥ इति भारतमाख्यानं कृ-
पया मुनिना कृतं ॥ एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः ॥ सर्वात्मकेनापि यदा नातुष्यद्धृदयं ततः ॥२६॥ नातिप्र-
सीदद्धृदयः सरस्वत्यास्तटे शुचौ ॥ वितर्कयन्विविक्तस्थ इदं चोवाच धर्मवित् ॥ धृतव्रतेन हि मया छंदांसि गु-
रवोऽग्नयः ॥२७॥ मानिता निर्व्यलीकेन गृहीतं चानुशासनं ॥ भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ॥२८॥ दृ-
श्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ॥२९॥ तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः ॥ असंपन्न इवाभाति
ब्रह्मवर्चस्यसत्तमः ॥३०॥ किंवा भागवता धर्मा न प्रायेण निरूपिताः ॥ प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः
तस्यैवं खिलमात्मानं मन्यमानस्य खिद्यतः ॥ कृष्णस्य नारदोऽभ्यागादाश्रमं प्रागुदाहृतं ॥३२॥ तमभिज्ञाय स-
हसा प्रत्युत्थायागतं मुनिः ॥ पूजयामास विधिवन्नारदं सुरपूजितं ॥३३॥ इति श्रीभागवते महापुराणे
प्रथमस्कंधे चतुर्थोऽध्यायः ॥४॥

जं तेजः तत्र साधवो ब्रह्मवर्चस्वास्तेषु सत्तमोऽपि श्रेष्ठोऽपि यज्ञानकेवलमसंपन्न इवाभाति अच्युतत्र ब्रह्मवर्चस्वानपि असन्न-
म इवाभाति ॥ पाठांतरे कमनीयमोऽपि असंपन्नो हेतुः स्वयमेवाशंकते किं चेति आह ॥३१॥ प्रायेणास्य स्वेन हि यस्माद्भाग-
वधर्मा अच्युतस्य प्रियाः ॥३१॥ खिलं न्यूनं खेदं प्राप्नुवतः कृष्णस्य व्यासस्य आश्रमं प्रागुदाहृतं सरस्वतीतटे शम्याप्रासे ॥३२॥ तं ना-
रदमागतमभिज्ञाय सहसा प्रत्युत्थाय विधिवत्पूजयामास ॥३३॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे चतुर्थोऽध्यायः

पंचमे सर्वधर्मे स्मोहं विकीर्तनं गोरवं ॥ व्यास चित्तप्रसादाय नारदेनोपदिश्यते ॥ ३ ॥ पत्र यो मे ऽभासी नैमिषे ऋषिरुहन्हुस्वाम हायशः
स्वयत्नो षड्स त्रिवे म नेन स्त्र खप्रहेति यो मितो ॥ यद्वा इवे त्वनधिकारी सर्वधर्म महो यमहान पिशुरव्यानीति सम्यसानः ॥ १ ॥ शरीर
शरीराभिमानी आत्मा आत्मनानेन शरीरेण किं किं पवितव्यति मानसः आत्मा मनो ऽभिमानी तेन मन सापविरहस्यति २
कश्चित्रोवाइति तेन जिज्ञासितं ॥ ज्ञानसिद्धयर्थं दियत्न सर्व संपन्न सम्यक्ज्ञानं स पिशास्त्रादत्तु ष्ठितं चेत्यर्थः ॥ अपि इति
पाठे संबोधने संपन्नं विहेतुः सहदस्तु नं इति सर्वे धर्मार्थ सीदितिः यहि हितं यरिसृतो ॥ ३ ॥ किं च यन्नस्नातनं निपंरं ब्रा
स्नानं चतवयाजिज्ञासितं मर्थीतं मधिगतं आसंचेत्यर्थः ॥ तथापि शोचसितन्त्विमर्थो सिति शेषः ॥ ४ ॥ आत्मापरीरो मा

सूतोवाच ॥ अथ तं सुखमासीनं उपासीनं हहस्रुवा ॥ देवर्षिः प्राह विप्रर्षिं वीणापाणिः स्मयन्निव ॥ १ ॥ श्रीना
रदः ॥ पाराशर्य महाभाग भवतः कच्चिदात्मना ॥ परितुष्यति शारीर आत्मा मानस एव वा ॥ २ ॥ जिज्ञासितं
सुसंपन्नमपि ते महदद्भुतम् ॥ कृतवान्भारतं यस्त्वं सर्वार्थपरिबृंहितं ॥ ३ ॥ जिज्ञासितमधीतं च ब्रह्म यत्तत्सना
तनं ॥ तथापि शोचस्यात्मानमकृतार्थ इव प्रभो ॥ ४ ॥ वेदव्यासः ॥ अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि ना
त्मा परितुष्यते मे ॥ तन्मूलमव्यक्तमगाधबोधं पृच्छाम हे त्वात्मभवात्मभूतं ॥ ५ ॥ स वै भवान्वेद समस्तगु
ह्यमुपासितो यत्पुरुषः पुराणः ॥ परावरेशो मनसैव विश्वं सृजत्यवत्यत्ति गुणैरसंगः ॥ ६ ॥ त्वं पर्यटन्नर्क इ
व त्रिलोकीमंतश्चरो वायुरिवात्मसाक्षी ॥ परावरे ब्रह्मणि धर्मतो व्रतैः स्नातस्य मे न्यूनमलं विचक्ष्व ॥ ७ ॥ आत्म

न सस्त्व तत्क्लेत स्मापरितो षुस्य कारणं अव्यक्तम स्केंदेह नारद त्वां पृच्छामि आत्मभवो ब्रह्मा तस्यात्मनो देहाद्भूतः
तमत एवागोयोतिगंभीरोवोधो यस्य तं त्वा ॥ अगाधबोधत्वं प्रपंचयन्नाह ॥ सवैइति द्वाभ्यां ॥ ५ ॥ सर्वगुह्यं त्वं निहे
तर्यत ॥ यस्मात्पुराणः पुरुषस्तु पासितः ॥ त्वयाकथंभूतः परावरेशः कार्यकारणनियंता मनसैव संकल्पमात्रेण गु
णैः कृत्वा विश्वं सृजतीत्यादि ॥ ६ ॥ किं च त्रिलोकीं पर्यटन्नर्क इव सर्वदर्शी योगबलेन च प्राणवायुरिव सर्वप्राणिना
मंतश्चरः सन् ॥ आत्मसाक्षी बुद्धिवृत्तिसाक्षी अतः परे ब्रह्मणि धर्मतो योगेन निस्नातस्य ॥ यद्वा योगेन स्नातस्य ॥ इज्याचा
रदमाहिंसादानस्वाध्यायकर्मणां ॥ अयं तु परमो धर्मो यद्योगेनात्मदर्शनं ॥ अवरे ब्रह्मणि वेदाख्ये व्रतैः स्वाध्याय नि

क्रियारिता

31

गापमालेनोद

श्री भाग्र टी ३५

२

अनुदितप्रायमनुक्तकल्पं भगवत्सुयशोदिमलं विना येनैवयमीदिशानेनासौ भगवान्न तुष्येत तद्दर्शनं ज्ञानं खिलं न्यूनं मन्ये न तु
भगवद्यशः प्राधान्येन तत्तन्नानुवर्णितं तत्त्वारूप्य येति ॥ यथा धर्मादयः धर्मादि सार्थना निवर्तन्ते यथा धर्मादिर्वर्णितास्तथा येन वासुदेवस्य महि
मा नोक्त इत्यर्थः ॥ वासुदेवेऽव्यक्तिरित्यनुक्ताविभक्तज्ञानं देवान्विप्र येषां वा कान्यर्थे त्रिलसेवेत्याह न इति ॥ ॥ चित्रपदमपि यद्वचो
हरेर्यशो न प्रगृणीत तद्वायसं तीर्थं काकतुल्यानां कामिनां रतिस्थानमुशन्ति मन्यन्ते ज्ञातः मानसाः सत्वप्रधाना न मनस्थि
तमाना हंसा यत्तु योषाने निरमन्ति कर्हिचिदपि निरवोन रमन्ते ॥ उशिक्क्षयाः उशिक् कमनीयं ब्रह्म तत्र यो निवासो येषां ते ॥ य
द्वा प्रसिद्धा हंसा मानससरसि चरन्तः कमनीयपद्मखण्डनिवासाः ॥ निर्मलविचित्रनानाद्विरे प्रक्षिप्तानि काककोडास्थाने
न निरमन्ते इति शेषः ॥ विनापि पदचातुर्यं भगवद्यशःप्रधानमेव वचः पवित्रमित्याह ॥१०॥ तद्वागिति स वाग्विसर्गो वाग्विसर्गः
वाचः प्रयोगः ॥ जनताया जनसमूहस्याघं विप्लावयति नाशयतीति तथा यस्मिन्वाग्विसर्गे प्रतिश्लोकमबद्धवत्यपि ॥ अपशब्दा

नारद ॥ भवतानुदितप्रायं यशो भगवतोऽमलं ॥ येनैवासौ न तुष्येत मन्ये तद्दर्शनं खिलं ॥८॥ यथा धर्मादयश्चा
र्था मुनिवर्यानुवर्णिताः ॥ न तथा वासुदेवस्य महिमा ह्यनुवर्णितः ॥९॥ न यद्वचश्चित्रपदं हरेर्यशो जगत्पवित्रं
प्रगृणीत कर्हिचित् ॥ तद्वायसं तीर्थमुशन्ति मानसा न यत्र हंसा निरमन्त्युशिक्क्षयाः ॥१०॥ तद्वाग्विसर्गो जनता ९
घविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि ॥ नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥
नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनं ॥ कुतः पुनः शश्वदभद्रमीश्वरे न चार्पितं कर्म यदप्यका

दियुक्तेपि प्रतिश्लोकमनन्तस्य यशोऽङ्कितानि नामानि भवन्ति ॥ तत्र हेतुः ॥ यद्यानि नामानि साधवो महान्तो वक्तरि सति शृण्वन्ति
श्रोतरि सति गृणन्ति ॥ अन्यदा तु स्वयमेव गायन्ति कीर्तयन्तीति ॥ भक्तिहीनं कर्म बंधनमेवेति किं वक्तव्यमित्यनेन दर्शयति
निष्कर्म ब्रह्म तदेकाकारत्वान्निष्कर्मतारूपं नैष्कर्म्यं अज्ञायतेऽनेनेति ज्ञानं अज्ञानोपाधिनिवर्तकं निरञ्जनमेवंभूतमपि ज्ञान
मच्युतभावो भक्तिः तद्वर्जितं चेत् ॥ अलमत्यर्थं न शोभते सम्यगपरोक्षाय न कल्पत इत्यर्थः ॥ तदा साधनकाले च फ
लकाले चाभद्रं दुःखरूपं यत्काम्यकर्म यदप्यकारणं अकाम्यं तच्चेति ईश्वरे नार्पितं चेत्कुतः पु
नः शोभते बहिर्मुखत्वेन सत्त्वशोधकत्वाभावात् ॥ तदेवं भक्तिशून्यानि ज्ञानवाग्ज्ञानकर्मकौशलानि निष्फलान्येवेत्यन्न॥

नैष्कर्म्यमपि
नैष्कर्म्यं

श्री· भाप्र· टी· ५

हरिः

नन्वेवं प्रवृत्तिमार्गे निंद्यमाने तर्हि निवृत्तिमार्गे सर्वक्रियात्यागेनैव परमेश्वरस्वरूपानुभूतेः॥ किं तत्र यशःकथनेनापि तत्राह।
विचक्षण इति निपुणः कश्चिदेव निवृत्तितः सर्वक्रियानिवृत्त्यास्य विभोः सुखं निर्विकल्पकस्वरूपं वेदितुं ज्ञातुं।
मर्हति॥ न पुनरविचक्षणाः प्रवृत्तिस्वभावः विस्मृतिहेतुः नातःकालतः पाचवदेशातीयमुस्त्रस्य विभोः चेष्टितं ततः कारणं
हे विभो॥ प्रवर्त्तमानस्य इमानि नानाप्रवृत्तीनि सत्वादिभिः प्रवर्तमानस्य स्वरूपदर्शनरहितस्य भवानिति तस्मिन्नर्थः॥ पाठं
तत्वेहि भवतीति सर्वोपर्येवं तावत्काम्यमपि दिवमर्थं हातव्यानि विहाय हरेर्लीलैव वर्णनीयेत्युक्तं॥ इदानीं नित्यानै
मित्तिककर्मनिष्ठामप्यनादृत्य केवलं भक्तिरेवोपदेष्टव्या स्या यश्यैनाहुरन्येकेति॥ १७॥ ननु धर्मस्याननुष्ठाने किं पतिपाके
नयदिह तार्थो भवेत्॥ तदा न कापि चिंता॥ यदि पुनरपक्व एव म्रियेत ततो भ्रष्टो हा स्वधर्ममपि तामित्तो नर्थः स्यादि

विचक्षणोस्यार्हति वेदितुं विभोरनंतपारस्य निवृत्तितः सुखं॥ प्रवर्तमानस्य गुणैरनात्मनस्ततो भवान्दर्श
य चेष्टितं विभो॥ १६॥ त्यक्त्वा स्वधर्मं चरणांबुजं हरेर्भजन्नपक्वोथ पतेत्ततो यदि॥ यत्र क्व वाभद्रमभूदमुष्य
किं को वार्थ आप्तो भजतां स्वधर्मतः॥ १७॥ तस्यैव हेतोः प्रयतेत कोविदो न लभ्यते यद्भ्रमतामुपर्यधः॥ तल्ल
भ्यते दुःखवदन्यतः सुखं कालेन सर्वत्र गभीररंहसा॥ १८॥

त्याशंक्याह॥ ततो भजनात्कथंचित्पतेत भ्रष्टो पतन्म्रियेत वा यदि तदापि भक्तिरसिकस्य कर्मानधिकारान्नानर्थशं।
कांगीकृत्याप्याह॥ वाशब्दः कटाक्षे॥ यत्र क्व वा नीचयोनावपि अमुष्य भक्तिरसिकस्याभद्रमभूत्किं नाभूदेवेत्यर्थः
भक्तिवासनासद्भावादित्यर्थः॥ अभजद्भिः तु केवलं स्वधर्मतः को वार्थ आप्तः॥ अभजतामिति षष्ठीत्वं संबंधमात्रविव
क्षया॥ ननु स्वधर्ममात्रादपि कर्मीपितृलोक इति श्रुतेः पितृलोकप्राप्तिफलमस्त्येव तत्राह॥ १८॥ तस्यैव हेतोस्सु
दर्थं यत्नं कुर्यात्॥ उपरि ब्रह्मपर्यंतमधः स्थावरपर्यंतं च भ्रमद्भिर्जीवैर्न लभ्यते॥ षष्ठी तु पूर्ववत्॥ ननु विषयसुखम
प्यनुएव प्राचीनकर्मणा सर्वत्र नरकादावपि लभ्यते दुःखवद्यथा दुःखं प्रयत्नं विनापि लभ्यते॥ नदतं॥ नदुक्तं। अप्रा
र्थितानि दुःखानि यथैवायांति देहिनां॥ सुखानि पि तथा मन्ये दैन्यं मत्रातिरिच्यते॥ यदुक्तो॥ यत्र क्व वाभद्रमभू।

यत

ख

म

तद

॥ श्रीभागवतटीका प्र टी ५

एग

प्राप्तः

अतोऽतः कारणात् ॥ अमोघा यथार्था दृक् यस्य सुविशुद्धं श्रवो यशो यस्य स तथा सत्ये रतः धृतानि व्रतानि नियमेन सः भवाने
वे महागुणस्तावदतु उरुक्रमस्य तस्य विविधं चेष्टितं लीलां समाधिना चिन्तयेत्युक्तम् ... वेयमुरुक्रमे येन मतुस
रस्मर्त्वा वर्णयेमर्थः ॥ एतत्सर्वं वाक्यांतरमिति निरूप्य प्रकरणस्य योगो नारदमुखः ॥ विपक्षे दोषांतरमाह ॥ ३ ॥ ततउरुक्र
मविचेष्टितात् पृथग्दृशः ॥ अत एवास्य घाश्रुकारांतरेण यत्किंचिदर्थांतरं विवक्षतः ॥ तया विवक्षया हेतुः स्फुरितैरूप
नामभिर्विकल्पयत्वेनोपस्थितैः दुःस्थिता अनवस्थिता सती मतिः कदाचित्क्वापि विषये आस्पदं स्थानं न लभेत वाताहृ
ताः नौरिव ॥ न उत्तमी नास्ते ॥ यत्र साधारणिका बुद्धिरेकेह कुरुनंदन ॥ बहुशाखा ह्यनंताश्च बुद्धयोऽव्यव
सायिनामिति ॥ न देवेह्रवियशोति नाभावतादिक्ष तैयमादिवर्णनेष्वपि किंचित्कथमित्युक्तं अमतविरुद्धमेव जातं

अतो महाभागभवानमोघदृक् शुचिश्रवाः सत्यरतो धृतव्रतः ॥ उरुक्रमस्याखिलबंधमुक्तये समाधिना
नुस्मर तद्विचेष्टितम् ॥ १३ ॥ ततोऽन्यथा किंचन यद्विवक्षतः पृथग्दृशस्तत्कृतरूपनामभिः । न कर्हिचित्क्वा
पि च दुःस्थिता मतिः लभेत वाताहतनौरिवास्पदम् ॥ १४ ॥ जुगुप्सितं धर्मकृतेऽनुशासतः स्वभावरक्तस्य
महान्व्यतिक्रमः ॥ यद्वाक्यतो धर्म इतीतरः स्थितो न मन्यते तस्य निवारणं जनः ॥ १५ ॥ ॥ ॐ रामजयी

इत्याह ॥ १५ ॥ जुगुप्सितमिति निंद्यं काम्यकर्म स्वभावत एव रक्तस्य रागिणः पुरुषस्य धर्मकृते धर्मार्थमनुशासतः
तव महान् व्यतिक्रमः ॥ अन्याय्यः ऊनत्वमतआह ॥ यस्य वाक्यतो ॥ यमेव मुख्यो धर्म इति स्थित इतरः प्राकृतो जनः
न सकाम्यकर्मादेः अनेन तत्त्वज्ञेन क्रियमाणं निवारणं स्वयमेव वा नेयात् क्रियमाणं न मन्यते यद्यपि अधिकारिभेदे
न नोक्तं तथापि भावेन कर्तानेन स्वकिल दुःखमेवेति भावः यद्वा न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशु
रिति स्मृत्या क्रियमाणं निवारणं यथा श्रेयस्तदिति न मन्यते किंतु प्रवृत्तिमार्गातिरिक्तं न विषयं तदितिकल्पयति न
उक्तं मतां नरोपन्यासेभरेषु ॥ तत्रैव प्राकालेत बलं येम्येपरवादयो नरा ॥ गुह्य स्वलेनशावपति कांतैतेषामयं विधिः
नैष्ठिक ब्रह्मचर्यं वा परिव्राजकतापि वा ॥ नेत्ववर्णय गृहीत व्याने नादोषमतु स्वादि ॥ १५ ॥ ॥ राम ॥

श्री भाग्र टी. ५९

अहं पुरा पूर्वकल्पेतीतभवे पूर्वजन्मनि वेदवादिनां दास्याः सकाशादभवं जातोस्मि निरूपितो नियुक्तः कयोगिनां शुश्रूषणे
प्रावृषि वर्षोपलक्षिते चातुर्मास्ये निर्विविक्षतां ॥ निर्वेशमेकत्र वासं कर्तुमिछतां ॥ २३ ॥ अपेतान्यखिलानि चापलानि यस्मा
स्मात्तस्मिन्नितेंद्रिये अधृतक्रीडनके क्रीडासाधने अनुवर्तिनि अनुकूले ॥ २४ ॥ उच्छिष्टस्य लेपानन्नलवान् ते द्विजै
रनुज्ञातः सन् भुंजे स्मोतेनैव भोजनेन पास्तकिल्बिषो जातोस्मि तेषां धर्मे एव भजने एवात्मनो मम रुचिः प्रजाय
ते स्मेत्यनुषंगः ॥ २५ ॥ अशृणवं श्रुतवानस्मि मे श्रद्धया मे एव वसतः प्रियश्रवस्यनंतयशसि बलाज्ञनिनषा ॥ अंगेति मम समस्य पे

अहं पुरातीतभवेऽभवं मुने दास्यास्तु कस्याश्चन वेदवादिनां ॥ निरूपितो बालक एव योगिनां शुश्रूषणे प्रावृषि
निर्विविक्षतां ॥ २३ ॥ ते मय्यपेताखिलचापलेऽर्भके दांतेऽधृतक्रीडनकेनुवर्तिनि ॥ चक्रुः कृपां यद्यपि तुल्यदर्शि
नः शुश्रूषमाणे मुनयोऽल्पभाषिणि ॥ २४ ॥ उच्छिष्टलेपाननुमोदितो द्विजैः सकृत्स्म भुंजे तदपास्तकिल्बिषः ॥
एवं प्रवृत्तस्य विशुद्धचेतसस्तद्धर्म एवात्मरुचिः प्रजायते ॥ २५ ॥ तत्रान्वहं कृष्णकथाः प्रगायतामनुग्रहेणा
शृणवं मनोहराः ॥ ताः श्रद्धया मेऽनुपदं विशृण्वतः प्रियश्रवस्यंग ममाभवद्रुचिः ॥ २६ ॥ तस्मिंस्तदा ल
ब्धरुचेर्महामते प्रियश्रवस्यस्खलिता मतिर्मम ॥ ययाहमेतत्सदसत्स्वमायया पश्ये मयि ब्रह्मणि कल्पि
तं परे ॥ २७ ॥ इत्थं शरत्प्रावृषिकावृतू हरेर्विशृण्वतो मेऽनुसवं यशोऽमलं ॥ संकीर्त्यमानं मुनिभिर्महात्मभि
र्भक्तिः प्रवृत्तात्मरजस्तमोपहा ॥ २८ ॥ तस्यैवं मेऽनुरक्तस्य प्रश्रितस्य हतैनसः ॥ श्रद्दधानस्य बालस्य दांतस्या

नुरक्तो प्रियं श्रवो यस्य तस्मिन् भगवति लब्धरुचेर्मम अस्खलिता अप्रतिहता मतिरभवदित्यनुषंगः ॥ २६ ॥ ययाहमस्या
पंचप्रपंचातीते ब्रह्मरूपे मयि सदसत्स्थूलसूक्ष्मं च एतच्छरीरं मायया स्वाविद्यया कल्पितं न तु वस्तुतोस्तीति तत्त्वणा।
मेव पश्यामि अतः सत्संग एवात्यंतशुद्धिहेतुरिति भावः एवं मम शुद्धे त्वंपदार्थे ज्ञाते देहादिकं न विदे पतिहेनेस्त।
त्वारस्याभूतरजस्तमोनिवर्तिका अत्यभक्तिर्जातेत्याह ॥ इत्थमिति ॥ २ ॥ हरेर्यशोनुसवं त्रिकालं ॥ २८ ॥ तस्येति श्रद्दधाने

मुकुंदसेवी जनः जातु कदाचित् कथंचन कुयोनिगतोपि संसृतिं नाव्रजेत् नाविशेत् अंगेत्याह्लादे अन्यवत् केवलकर्मिनिष्ठवदिति वै
धर्म्यदृष्टांतः कुत इत्यत आह ॥ मुकुंदांघ्र्योरुपगूहनमालिंगनं पुनः स्मरन् विहातुं नेच्छेत् यतोयं जनो रसग्रहः रसेन र
मणीयेन गृहस्तेन वशीक्रियते ॥ यद्वा रमणीयग्रहणात् गृहो यस्य ॥ तदुक्तं भगवता यतते च ततो भूयः संसिद्धौ कुरुनंदन पू
र्वाभ्यासेनैतेनैव ह्रियते ह्यवशोपि सन्निति ॥ तदेवं भगवल्लीलाप्राधान्येनानुवर्णनीयमुक्तं तत्र को भगवान् का वा तस्य
लीला इत्यपेक्षायामाह ॥ १९ ॥ इदं विश्वं भगवानेव स तु अस्माद्विश्वस्मादितरः ईश्वरात् प्रपंचो न पृथक् ईश्वरस्तु प्रपंचात् पृ
थगित्यर्थः तत्र हेतुः यतो भगवतो हेतोः जगतः स्थित्यादयो भवंति अनेनैव लीला अपि प्रदर्शिताः यद्वा इदं विश्वं भग

नवैजनो जातु कथंचनाव्रजेन्मुकुंदसेव्यन्यवदंग संसृतिं ॥ स्मरन्मुकुंदांघ्र्युपगूहनं पुनर्विहातुमिच्छेन्न रसग्रहो
जनः ॥ १९ ॥ इदं हि विश्वं भगवानिवेतरो यतो जगत्स्थाननिरोधसंभवाः ॥ तद्धि स्वयं वेद भवांस्तथापि वै प्रादेश
मात्रं भवतः प्रदर्शितं ॥ २० ॥ त्वमात्मनात्मानमवेह्यमोघदृक् परस्य पुंसः परमात्मनः कला ॥ अजं प्रजातं जग
तः शिवाय तन्महानुभावाभ्युदयोधिगण्यतां ॥ २१ ॥ इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च
बुद्ध सूतदत्तयोः ॥ अविच्युतोर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनं २२ ॥ ॥ ॥ ॥ ॥

स्वतः स्वयः सज्ञो वोपि भगवान्

वानिवेतरो नाचेतनवत्पृथक्त्वेन प्रपंचस्तद्व्यतिरेकेण नास्ति स एवैकस्तत्त्वमित्यर्थः ॥ हि यस्मादेवं सर्वं खल्विदं ब्रह्मेत्यादि प्र
माणसिद्धं विततं तद्धि स्वयमेव भवान्वेद प्रादेशमात्रं ॥ उपदेशमात्रं ॥ आचार्यमात्ररूपेण वेदेत्यादिकमर्थं संपादनाय प्रद
र्शितं ॥ न च तवाचार्योपेक्षा ईश्वरावतारत्वादित्याह ॥ त्वमिति ॥ २० ॥ हे अमोघदृक् त्वमात्मना स्वयमात्मानमेवाजं संतं
जगतः शिवाय प्रजातमवेहि कुतः परस्य पुंसः कलांशभूतं ततस्तन्महानुभावस्य हरेरभ्युदयः पराक्रमोधिग
ण्यतां निरूप्यतां ॥ अनेनैव तपआदि सर्वं सफलं नवस्यादित्याह इदं हीति ॥ २१ ॥ कृतादेर्यो भावे निष्ठा इदमेव हि
तपःश्रवणादेरविच्युतो नित्यार्थः ॥ फलं किं तत् ॥ उत्तमश्लोकस्य गुणानुवर्णनं यत् ॥ सत्संगात् हरिकथाश्रवणादिफले

प्रथमस्कंधटीका ॥ ३८ ॥ ५ ॥

एक इति

श्री॰ भाग॰ टी॰ ०

यत्र यदा भगवतः शिक्षया कर्माणि कुर्वाणास्तदा कृष्णस्य गुणानामानि गृणन्ति अनुस्मरन्ति च कृष्णस्मिति यद्यर्थः॥ इदं च भागव
च्छिक्षया गीतासु॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्॥ यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणमिति॥ कीर्तनं स्मरणं च गाह
पमेतत्कि हेतुरत्र कर्मे ज्ञाने हेतुस्तत्र मा हृदस्थापनमत्र इति॥ ३६॥ नमो धीमहि मन्त्रस्य नमनं च ध्यानं चाहि॥ ३७॥ अमूर्तिकं मंत्रोऽर्जयति
विना मूर्तिं मूर्तिमत्त्वेन यजते स पूजयति॥ एवं च कृते सति॥ सम्यग्ज्ञानं भवतीत्याह॥ एवं कृतवति मयि हृष्टः स्वस्मै तु ज्ञानादि
दत्तवानित्याह॥ ३८॥ इमं स्वनिगमं स्वोपदेशं [illegible] मयानुष्ठितं सर्वमेवावेत्य ज्ञात्वा भावं प्रीतिं च॥ अतस्त्वमप्येवं कुर्वित्याह॥

कुर्वाणा यत्र कर्माणि भगवच्छिक्षयासकृत्॥ गृणन्ति गुणनामानि कृष्णस्यानुस्मरन्ति च॥ ३६॥ नमो भगवते तुभ्यं
वासुदेवाय धीमहि॥ प्रद्युम्नायानिरुद्धाय नमः संकर्षणाय च॥ ३७॥ इति मूर्त्यभिधानेन मंत्रमूर्तिममूर्तिकम्॥
यजते यज्ञपुरुषं स सम्यग्दर्शनः पुमान्॥ ३८॥ इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम्॥ अदान्मे ज्ञानमैश्वर्यं स्व
स्मिन्भावं च केशवः॥ ३९॥ त्वमप्यदभ्रश्रुत विश्रुतं विभोः समाप्यते येन विदां बुभुत्सितम्॥ प्राख्याहि दुःखैर्मु
हुरर्दितात्मनां संक्लेशनिर्वाणमुशन्ति नान्यथा॥ ४०॥ इति श्रीभागवते प्रथमस्कंधे पंचमोऽध्यायः॥ ५॥ सूतः॥
एवं निशम्य भगवान्देवर्षेर्जन्म कर्म च॥ भूयः पप्रच्छ तं ब्रह्मन्व्यासः सत्यवतीसुतः॥ १॥ वेदव्यासः॥ भिक्षुभि
र्विप्रवसिते विज्ञानादेष्टृभिस्तव॥ वर्तमानो वयस्याद्ये ततः किमकरोद्भवान्॥ २॥ स्वायंभुव कया वृत्त्या वर्तितं

त्वमिति॥ ३९॥ अदभ्रमनल्पं श्रुतं यस्य [illegible] हे अदभ्रश्रुत विभोर्यशः प्राख्याहि कथय येन विश्रुतेन तद्धि विदां विदुषां बुभु
त्सितं बोद्धुमिष्टं समाप्यते॥ यतो दुःखैः पीडितानां क्लेशशान्तिप्रकारान्तरेण न मन्यन्ते॥ ४०॥ इति श्रीभावार्थदीपिकायां प्रथम
स्कन्धे पंचमः॥ ५॥ व्यासस्य प्रश्नयार्थं च षष्ठे प्राक्जन्मसंभवं॥ स्वमार्गं नारदः प्राह कृष्णसंकथनोद्भवम्॥ स्वयमपि
तेभ्यो भिक्षुभ्य उपदेशानन्तरं भावितत्वं स्विदिति पृच्छति भिक्षुभिरिति॥ विप्रवसिते स्वदेशान्तरं गते सति विज्ञानादेष्टृभिः॥ २
परं वयः उत्तरमायुः तेन च्युत्या कया वर्तितं नीतं इदमिति दासीपुत्रभूतं कलेवरं मुक्तवान्किं॥ उत्तरं दृष्टवानसि॥ ३॥ ४॥ राम

38

गुह्यतममिति सार्धं यच्च भूतं तद्धर्मतत्त्वज्ञानं गुह्यं तस्मादपि विविक्तात्मज्ञानं ततोऽपि च रहस्यज्ञानं गुह्यतमं भगवतोदितं भागवतशास्त्र
मन्वोचन्नुपदिष्टवन्तः॥ तदेव ज्ञानं पूर्वोक्तं पदार्थज्ञानाद्विवेकेन दर्शयति॥ येनैवेति॥ ३१॥ अविदं ज्ञातवानहं तत्साध
नधर्मरहस्यं संसूचितमित्याह एतदिति॥ ३२॥ तापत्रयस्याध्यात्मिकादेश्चिकित्सितं भेषजं निवर्तकं संशोधकमितियाव
त् किं तत् भगवति भावितं समर्पितं यत्कर्म तत्॥ कथंभूते भगवति ईश्वरे ब्रह्मणि यन्तरि॥ एवमपि तत्र ब्रह्मणि प्रसज्जतस्
रीस्वरूपे ननु संसारहेतोः कर्मणः कथं तापत्रयनिवर्तकत्वं [illegible] सामग्रीभेदेन दृष्टान्ते इति सदृष्टान्तमाह द्वाभ्यां ३२

ज्ञानं गुह्यतमं यत्तत्साक्षाद्भगवतोदितं॥ अन्ववोचन् गमिष्यन्तः कृपया दीनवत्सलाः॥ ३०॥ येनैवाहं भगवतो वा
सुदेवस्य वेधसः॥ मायानुभावमविदं येन गच्छन्ति तत्पदम्॥ ३१॥ एतत्संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्
यदीश्वरे भगवति कर्म ब्रह्मणि भावितम्॥ ३२॥ आमयो यश्च भूतानां जायते येन सुव्रत॥ तदेव ह्यामयं द्रव्यं न
पुनाति चिकित्सितम्॥ ३३॥ एवं नृणां क्रियायोगाः सर्वे संसृतिहेतवः॥ त एवात्मविनाशाय कल्पन्ते कल्पि
ताः परे॥ ३४॥ यदत्र क्रियते कर्म भगवत्परितोषणम्॥ ज्ञानं यत्तदधीनं हि भक्तियोगसमन्वितम्॥ ३५

यश्चामयो रोगो येन घृतादिना जायते तदेव केवलमामयकारणभूतं द्रव्यं तमामयं न पुनाति न निवर्तयतीत्यर्थः॥ किंतु
चिकित्सितं द्रव्यान्तरैर्भावितं सत्तन्नाशयेव॥ यथा॥ ३३॥ आत्मविनाशाय कर्मनिर्हरणाय॥ कल्पन्ते समर्था भवन्ति परे ईश्वरे कल्पि
ताः॥ अर्पिताः सन्तः॥ अत्र च प्रपञ्चं महद्भिः सेवा ततः तत्कृपा ततस्तद्धर्मश्रद्धा ततो भगवत्कथाश्रवणं॥ ततो भगवति रतिः
तया च देहद्वयविवेकात्मज्ञानं॥ ततो दृढा भक्तिः॥ ततो भगवत्तत्त्वविज्ञानं॥ ततस्तत्कृपया सर्वज्ञत्वादिभगवद्गुणावि
र्भाव इति क्रमो दर्शितः॥ ननु च ज्ञानेनाज्ञाननाशात्कर्मनाशः॥ तच्च ज्ञानं भक्तियोगाद्भवति॥ कथं कर्मणां कर्मनाशः
स्यात्तत्राह॥ यदत्रेति॥ ३५॥ भगवदर्पणेन क्रियमाणं कर्म भक्तियोगं जनयति॥ इति सदाचारेण दर्शयति॥ ३५

श्री

श्री॰ भाप्र॰ टी॰ २९

र्वाणां यस्येति वासः पंचभूतात्मको देहो न्यपतत् ॥ अनेन पार्षदतनूनाम कर्मारब्धत्वं शुद्धत्वं नित्यत्वं इत्यादि सूचितं भवति २९
इदं त्रैलोक्यमात्मयोगे संहृत्योदन्वत एकार्णवस्याम्भसि शयाने श्रीनारायणे शिशयिषोः शयनेच्छोः विभोर्ब्र
ह्मणोऽन्तर्मध्ये अनुप्राणं निःश्वासेन सह विविशे प्रविष्टोहं ॥ आत्मनेपदमार्षः ॥ ततो वतीर्य विश्वान्मादेहमाविसृष्टपचेक्ति
णा ॥ अत्रापि वैष्णवी निद्रा मे का भूयाच विलक्षणेति ह्युक्तमिति ॥ शयाने भसि यावत ॥ शयानेस्वस्याय नेंभसि शिशयिषोर्ब्र

कल्पांत इदमादाय शयानेंभस्युदन्वतः ॥ शिशयिषोरनुप्राणं विविशेंतरहं विभोः ॥ ३० ॥ सहस्रयुगपर्यंते उ
त्थायेदं सिसृक्षतः ॥ मरीचिमिश्रा ऋषयः प्राणेभ्योहं च जज्ञिरे ॥ ३१ ॥ अंतर्बहिश्च लोकांस्त्रीन्पर्यम्यस्कंदितव्र
तः ॥ अनुग्रहान्महाविष्णोरविघातगतिः क्वचित् ॥ ३२ ॥ देवदत्तामिमां वीणां स्वरब्रह्मविभूषितां ॥ मूर्छयि
त्वा हरिकथां गायमानश्चराम्यहं ॥ ३३ ॥ प्रगायतः स्ववीर्याणि तीर्थपादः प्रियश्रवाः ॥ आहूत इव मे शीघ्रं द वर्णनं
र्शनं याति चेतसि ॥ ३४ ॥ एतद्ध्यातुरचित्तानां मात्रास्पर्शेच्छया मुहुः ॥ भवसिंधुप्लवो दृष्टो हरिचर्यानुवर्णनं ॥ ३५
यमादिभिर्योगपथैः कामलोभहतो मुहुः ॥ मुकुंदसेवया यद्वत्तथाद्धात्मा न शाम्यति ॥ ३६ ॥ ॥ ~ ॥ ~ राम

स्वांशादिति श्रीनारायणेनाभेदविवक्षया क्रमितिगमयितव्यं ॥ ३० ॥ प्राणेभ्य इंद्रियेभ्योहं मरीचिमिश्रास्तन्मुख्या ऋ
षयश्च जज्ञिरे ॥ सहस्रमितो ब्रह्मणः ॥ ३१ ॥ ये कर्मिणोस्त बहिर्यांति तत्पश्चादिभिर्ब्रह्मलोकं गताः ॥ अंतर्नयांति त्र्या
हं तत्र महाविष्णोरनुग्रहादस्कंडितब्रह्मचर्यव्रतः सन्नंतर्बहिश्च पर्येमि पर्यटामि क्वचिदविघाताः प्रतिहता गति
र्यस्य सः ॥ किमिति पर्यटसीत्यत्राह या लोकमंगलार्थमिमनं प्राहह चतुर्भिः ॥ ३२ देवेनेश्वरेण दत्तां स्वराः निषादर्ष २९
भगांधारषड्जमध्यमदैवतपंचमास्तिसम ॥ १ ॥ ॥

ईस्वरो हन्तेति सा उक्तं पसं बोधयने मा इति सा इहं न्ता हन्ति ॥ यतो न विपक्षाद द्रयाः कषाया मलाः कामादयो येषां ते षां ऊयो गिनां षा
त्र्योगानां ॥ अहं उर्द्दर्शः अप्रमऊं तस्ला ईदृह्सो सिन न्नुहृ ॥ २२ ॥ सकृद्दर्शि तिं मयेति यत् एतत्कामाय मम श्रु राया यतत्का मेव
कि मिमतन्या हृ सत्कामः प्रमानरठ कुर्यात्कामा मम योसुचति ॥ २३ ॥ मतं मैव यादी र्या या पिअ वधंति येलो के देहे हि त्वा मजन
तो मम मार्षद तां यं तासि ॥ २४ ॥ प्रज्ञानां मत्तेभिर्द्दोनि नो यस्ह देवे पिप्रज्ञा मर्वास्या निरो ये इति वा ॥ २५ ॥ तन्या सिद्धं महहूतं प्रसा मह
तो भूतस्पतिः स्पसितमेत उक्तस्येदइति ख्यतेः कीदृशो ईश्वरे सर्व निपं तार्ननभासिलिं वंसूर्तिर्ये स्प तत्र भो लिंतं से निहितन्मा

हन्तास्मि जन्मनि भवान्न मा ह दृष्ट मिसार्हति ॥ अविपक्षकषायाणां उर्द्दर्शो हं ऊयोगिनां ॥ २२ ॥ सकृद्दर्शितिं रूपमेत
त्कामायतेन त्व ॥ मत्कामश्यानकेः सायुः रूपं चति रुकुयात् ॥ २३ ॥ सत्मेव यादीर्ये याते जानाम यि रूपमतिः हि
त्वा वयमिमेलोके गीता मजनतामसि ॥ २४ ॥ मति मयि निबद्धे न दि पयेत कार्हि चित ॥ प्रज्ञा सर्वनिरो ये पि स्मतिस्व
मदनुग्रहात ॥ २५ ॥ एतावन्नो पदवा मतत्कामुहृतं तमसोलिं गंसी प्व वे ॥ अहं च । तस्मेम हत्वां मद्दीयसे शीलविना
मं विदधे उकेपितः ॥ २६ ॥ नासामने ने तस्य कृत न्नुपः एवं नु सा नि मद्दापि हुत्वा निच स्मरन ॥ यां पर्यटं स्तूह मनाग
तस्पृहः कालेश्रती त्व विमदोविमत्सरः ॥ २७ ॥ एवं कृत्ना मतेत्नसन सक्तस्पा मलात्मनः ॥ कालः प्रादुरभूत्काले
तडित्सौदामिनी यथा ॥ २८ ॥ प्रयुज्यमाने मयि तां शुद्धां भागवतीं तनुम् ॥ आरब्धकर्मनिर्वाणो न्यपतन्पांचभौतिकः उपः

अपि लिंगयते ज्ञायते लिंगं न लिंगयते इम्म लिंगं तस्मे अहं हाय यथवा मं प्रया में विदधे हृ तवा नरं ॥ तिनातु कंपितः स्नत हृत
मृक्तलज्जः सति मत्सरो जातो स्पीतिशेषः ॥ २७ ॥ काले स्लाव सेवकालोमस्मुः ॥ प्रादुरभूत् अविर्बभूव ॥ अकस्मादाविर्भावेर
हीतः ॥ तडि दिवेति सा दामिनी ति विशेषणं स्फुट त्वप्रदर्शनार्थं सुदामा मालानं त्र भवा सौदामिनी मालाका वेमर्थः ॥ यद्वा
सुदामा पर्वतः ॥ तेने कादिप्रिनिस्वजे गणरप्पटिकादि मयपर्वत सोतेभवा ह्रिवि यफदितिम्फुरा भवति तत्र हृदि मर्थः ॥ यद्वा
सुदामा पर्न तडिदित्पति कर मर्थ ॥ तडि दं ति कवाज्ञयोविति नेकमास्मवरणात ॥ आंतिके प्रादुर्भूता सौदामिनीच ॥ २८ ॥ प्रयुज्य
माने मयि तामित्युय मचार्थः ॥ हित्वा वयमिमें लोके गीता मजनतामसीति या भागवतीतनुः भगवत्पार्षद रूपाशुद्धा सत्वमयी
तनुः प्रतिश्रुता तां प्रति भगवता मयि प्रयुज्यमाने नीयमाने सत्यारब्धं यत्कर्म तन्निर्वाणां समाप्तं यस्य स उक्तमाहः ॥ निर्वाणमेवनि

२५

श्री
भाग्प्र
टी
८

चित्रैर्धातुभिः स्वर्णादिजनादिमिश्रितविचित्र[illegible]मं हीश्च ॥ दृष्टैर्वर्षं गृहस्थानां शास्त्रतो येषां ते कुमार्गेषु वर्तमान ॥ पिबानितमदाप्तीः
जलानि येषां तान् नलिनीः सरसीः ॥ २२ चित्रास्वनाः येषां तैः पत्रिभिः नभ्रष्टं वर्त्म येषां ते विभ्रमं दिग्भ्रमैः शैरेः श्यामायाः
सौता नलिनी ॥ १३ ॥ अतियातो निकृष्टमार्गः स्मनुतद्द्विपिनं वनमत्रास्तं कीर्णं श्यामलवेणुश्शराणां स्तम्बैः कुशैः कीचकैश्च
गह्वरं दुर्गमं ॥ तत्र वेणुर्ज्ञातयाप्रवृद्धि पुलानतराल गर्भैः कीचकाः सच्छिद्रवेणवः इति यावत ॥ १४ ॥ घोरं दृष्टम यथा सर्पोलूक
सहंप्रतिभयाकारं भयंकरं दृष्टपूर्वमालादीनामजिरं क्रीडास्थानं एवं दृष्टवानस्मि परिश्रान्तानीन्द्रियाणि आत्मा देहश्च

चित्रधातुविचित्राद्रीनिभभग्नभुजद्रुमान् ॥ जलाशयाञ्छिवजलान्नलिनीः सुरसेविताः ॥ १२ ॥ चित्रस्वनैः पत्ररथैर्विभ्रमद्भ्रमरश्रियः ॥ नलवेणुशरस्तम्भकुशकीचकगह्वरं ॥ १३ ॥ एक एवातियातोऽहमद्राक्षं विपिनं महत् ॥ घोरं प्रतिभयाकारं व्यालोलूकशिवाजिरं ॥ परिश्रान्तेन्द्रियात्माहं तृट्परीतो बुभुक्षितः ॥ १४ ॥ स्नात्वा पीत्वा ह्रदे नद्या उपस्पृष्टो गतश्रमः ॥ तस्मिन्निर्मनुजेऽरण्ये पिप्पलोपस्थ आश्रितः ॥ १५ ॥ आत्मनात्मानमात्मस्थं यथाश्रुतमचिन्तयन् ॥ १६ ॥ ध्यायतश्चरणाम्भोजं भावनिर्जितचेतसा ॥ औत्कण्ठ्याश्रुकलाक्षस्य हृद्यासीन्मे शनैर्हरिः ॥ प्रेमातिभरनिर्भिन्नपुलकाङ्गोऽतिनिर्वृतः ॥ आनन्दसम्प्लवे लीनो नापश्यमुभयं मुने ॥ १८ ॥ रूपं भगवतो यत्तन्मनःकान्तं शुचापहं ॥ अपश्यन्सहसोत्तस्थे वैक्लव्याद्दुर्मना इव ॥ १९ ॥ दिदृक्षुस्तदहं भूयः प्रणिधाय मनो हृदि ॥ वीक्षमाणोऽपि नापश्यमवितृप्त इवातुरः ॥ २० ॥ एवं यतन्तं विजने मामाहागोचरो गिरां ॥ गम्भीरश्लक्ष्णया वाचा

यस्य सतृष्णा परीतो बामः ॥ १५ ॥ उपस्पृष्ट आचान्तः पिप्पलोपस्थे अश्वत्थमूले उपविष्टः बुद्ध्या आत्मस्थं हृदिस्थमात्मानं
परमात्मानं ॥ १६ ॥ भावेन भक्त्या निर्जितं वशीकृतं चेतो येन तस्य ममौत्कण्ठ्येनाश्रुकलाकुले लोचने यस्य स तस्य मे शनैर्हरिर्हृदि
प्रादुर्भूतः ॥ १७ ॥ प्रेमणोऽतिभरेण निर्भिन्नपुलकानि अङ्गानि यस्य आनन्दात्मसम्प्लवे मग्नः सन् उभयमात्मानं परं च ॥ १८ ॥ म
नसः कान्तमभीष्टं शुचापशोकस्यापहन्ति तिन पातरा ॥ उत्तस्थे अस्थितोऽस्मि ॥ २० ॥ हृदि मनः प्रणिधाय स्थिरीकृत्य अ
वितृप्तोऽहमातुरइवाभवमिति शेषः ॥ २१ ॥ गिरामगोचरः संवेदनस्याविषयभूत ईश्वरः ॥ २२ ॥ राम ॥

हरिः
१८

परमानंदे

एषकल्पांतलक्षणः कालः ते स्मृतिं कथं न व्यवधात् न खंडितवान् ॥ प्रज्ञायाः मा भावः न्यायः ॥ यतो ह्येष सर्वस्य निराकृतिः प-
लापो [illegible] यस्मात् ॥ ४ ॥ अकारिषं कृतवानस्मि रेफषकारयोर्विश्लिष्टः छंदोनुरोधेन ततः तावत्कंचित्कालं ततो वैव मातृस्नेहयं-
त्रितोऽयं वसमित्याह द्विभिः ॥ ५ ॥ एक एवात्मजोऽहं यस्याः सा योषित् [illegible] स्नेहानुबंधं [illegible] किंकरी परस्य प्रेष्यवृत्तिः ॥ ६ ॥
अस्वतंत्रा सा अतो न कल्पा समर्था नासीत् क्षेमं इच्छंती योगक्षेमं विधातुं [illegible] ॥ ७ ॥ तदेवं सा स्वस्य [illegible] ॥ अहं च तद्ब्रह्मकुले दिग्देशानभि-
ज्ञस्तत्रैव [illegible] निवसन्नित्याह ॥ अहं चेति ब्रह्मकुले [illegible] तस्यां मातर्युपेक्षया [illegible] कदा विरमेदिति प्रतीक्षमाणः [illegible]
उषिवान् वासं कृतवान् पंचहायनः ॥ पंचवर्षः ॥ ८ ॥ [illegible] गां दुहंतीं [illegible] दोग्धुं निर्गतामित्यर्थः ॥ पदा

प्राक्कल्पविषयामेतां स्मृतिं ते मुनिसत्तम ॥ न ह्येष व्यवधात्काल एष सर्वनिराकृतिः ॥ ४ ॥ नारद उवाच ॥ भिक्षुभिर्विप्रव-
सिते विज्ञानादेष्टृभिर्मम ॥ वर्तमानो वयस्याद्ये तत एतदकारिषं ॥ ५ ॥ एकात्मजा मे जननी योषिन्मूढा च किंकरी
मय्यात्मजेनन्यगतौ चक्रे स्नेहानुबंधनं ॥ ६ ॥ सास्वतंत्रा न कल्पासीद्योगक्षेमं ममेच्छती ॥ ईशस्य हि वशे लोको यो-
षा दारुमयी यथा ॥ ७ ॥ अहं च तद्ब्रह्मकुले ऊषिवांस्तदपेक्षया ॥ दिग्देशकालाव्युत्पन्नो बालकः पंचहायनः ॥ ८ ॥
एकदा निर्गतां गेहाद्दुहंतीं निशि गां पथि ॥ सर्पोऽदशत्पदा स्पृष्टः कृपणां कालचोदितः ॥ ९ ॥ तदा तदहमीशस्य
भक्तानां शमभीप्सतः ॥ अनुग्रहं मन्यमानः प्रातिष्ठं दिशमुत्तरां ॥ १० ॥ स्फीतांजनपदांस्तत्र पुरग्रामव्रजाकरा-
न् ॥ खेटखर्वटवाटीश्च वनान्युपवनानि च ॥ ११ ॥

पादेन स्पृष्टः पदाक्रांतः ॥ अदशद्दष्टवान् ॥ ९ ॥ तन्मातुर्मरणं शं कल्याणमिच्छतोनुग्रहं मन्यमानः ॥ उत्तरां दिशं
प्रातिष्ठं प्रस्थितोस्मि ॥ १० ॥ स्फीतान् जनपदादीनतियातः सन्नद्राक्षमिति पंचमश्लोकेनान्वयः ॥ जनपदादिषु नाना
गुणदोषयुक्तेषु समदृष्टिः सन्गतोहमिति तात्पर्यं ॥ स्फीतान् समृद्धान् जनपदान् देशान् ॥ तत्र तस्यां दिशि पुरग्रामव्रजाकरा-
न् ॥ तत्र पुराणि राजधान्यः ॥ ग्रामाः [illegible] ॥ विप्राश्च विप्रभृत्याश्च यत्र चैव वसंति हि ॥ स तु ग्राम इति प्रोक्तः शूद्राणां वास
एव चेति ॥ व्रजा गोकुलानि ॥ आकराः [illegible] खेटः कर्षकग्रामाः ॥ खर्वटा गिरितटग्रामाः [illegible]
वा ॥ एकतो यत्र तु ग्रामो नगरं चैकतः स्थितं ॥ मिश्रं तु खर्वटं नाम नदीगिरिसमाश्रयमिति ॥ वाट्यः पुष्पवाटिकाः ॥ वनो-

निस्वतः सिद्धवृत्तानां समूहः ॥ उपवनानि रोपितवृक्षसमूहाः तानि
च ॥ ॥ ॥

प्रणिहिते निश्चले ॥ अत्र हेतुर्भक्तियोगेनामले पूर्णं पुरुषमीश्वरमपश्यदित्यर्थः ॥ पूर्णमीश्वरमिति वा पाठः ॥ तदपा-
श्रयामीश्वराश्रयां तदधीनां मायां चापश्यत् ॥ ईशमायाकृतो नीशजीवात्मसंसृतिमपश्यदित्याह ॥४॥ यया संमो-
हितः स्वरूपावरणेन विमोहितः परोपि त्रिगुणात्मव्यतिरिक्तोपि तत्कृतं त्रिगुणात्माभिमानकृतमनर्थं च कर्तृत्वादिकं प्रा-
प्नोति ॥५॥ अनर्थमुपशमयतीति अधोक्षजे भक्तियोगः तं चापश्यत् एतत्सर्वं स्वयं दृष्ट्वा ॥ एवमजानतो लोकस्यार्थे
सात्वतसंहितां श्रीभागवताख्यां चक्रे ॥ तदेवं श्रवणमात्रेण भागवतार्थः संक्षेपतो दर्शितः ॥६॥ संहिताया अनर्थो-

भक्तियोगेन मनसि सम्यक्प्रणिहितेमले ॥ अपश्यत्पुरुषं पूर्णं मायां च तदपाश्रयां ॥४॥ यया संमोहितो
जीव आत्मानं त्रिगुणात्मकं ॥ परोपि मनुतेनर्थं तत्कृतं चाभिपद्यते ॥५॥ अनर्थोपशमं साक्षाद्भक्तियोग-
मधोक्षजे ॥ लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहितां ॥६॥ यस्यां वै श्रूयमाणायां कृष्णे परमपूरुषे
भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥७॥ स संहितां भागवतीं कृत्वानुक्रम्य चात्मजं ॥ शुकमध्या-
पयामास निवृत्तिनिरतं मुनिः ॥८॥ शौनकः ॥ स वै निवृत्तिनिरतः सर्वत्रोपेक्षको मुनिः ॥ कस्य वा बृह-
तीमेतां आत्मारामः समभ्यसत् ॥९॥ ॥

पशमकत्वं दर्शयति ॥ यस्यां श्रूयमाणायामेव किं पुनः कृतायामित्यर्थः ॥ अत्रेवमाशोधयित्वा एतदुक्तं भवति वि-
द्याशक्त्या मायानियंता नित्याविर्भूतपरमानंदस्वरूपः सर्वज्ञः सर्वशक्तिरीश्वरः ॥ तन्मायया संमोहितः तिरोभूत-
स्वरूपस्तद्विपरीतधर्मा जीवः ॥ तस्य चेश्वरभक्त्या लब्धज्ञानेन मोक्ष इति ॥ तदुक्तं स्वामिना ॥ ह्लादिन्या संविदाश्लिष्टः स-
च्चिदानंद ईश्वरः ॥ स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः ॥ तथा ॥ स ईशो यद्वशे माया स जीवो यस्तयार्दितः ॥
स्वाविर्भूतपरानंदः स्वाविर्भूःसुदुःखभूः ॥ स्वादृगुत्थविपर्यासभवभेदजभीशुचः ॥ यन्मायया जुषन्नास्ते तमिमं

राम
२०

एवं ब्रह्मन्ब्रह्मणाभिर्वीजकलात्॥ तेन विभूषितो स्वतः सिद्धसमस्तस्वार्थासिमर्थः॥ मूर्छयित्वा मूर्छनालापवतीं कृत्वा प्रगायन्
नदति स्वप्रयोजनमाह॥३३॥ परप्रयोजनमाह॥ एतदिति॥३४॥ मात्राविषयास्तेषां स्पर्शभोगास्ते यामिच्छया घूर्णितातुरा
णां चिन्तानि येषां तेषां हरिचर्यानुवर्णनं यदेतदेव भवसिन्धोः प्लवः पोतः न केवलं स्पृशति आत्मा मात्रेण न किंतु न्तयत्यति वेका
भ्यां तृष्णपेवमर्थः॥ एतदेव स्वानुभवेन ध्यायामानु भवेन दृढयति॥३५॥ यमादिभिः न यावत्शाम्यति॥ यथा मुकुंदसेव
यायद्वत्सा ... आत्मा मनः शाम्यति॥ कथंचित् मुकुंदसेवामात्रेण शाम्यति किं पुनः ननु ... नेतिभाव॥३५॥२

सर्वं तदिदमाख्यातं यत्पृष्टोहं त्वयानघ॥ जन्मकर्मरहस्यं मे भवतश्चात्मतोषणम्॥३६॥ सूत उवाच॥ एवं संभाष्य
भगवान्नारदो वासवीसुतं॥ आमंत्र्य वीणां रणयन्ययौ यादृच्छिको मुनिः॥३७॥ अहो देवर्षिर्धन्योयं यत्कीर्तिं शा
र्ङ्गधन्वनः॥ गायन्माद्यन्निदं तन्त्र्या रमयत्यातुरं जगत्॥३८॥ इति श्रीभागवते प्रथमस्कंधे षष्ठोध्यायः॥६॥ श्री
शौनकः॥ निर्गते नारदे सूत भगवान्बादरायणः॥ श्रुतवांस्तदभिप्रेतं ततः किमकरोद्विभुः॥१॥ सूत उवा
च॥ ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे॥ शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः॥२॥ तस्मिन्स्व आ
श्रमे व्यासो बदरीषंडमंडिते॥ आसीनोप उपस्पृश्य प्रणिदध्यौ मनः स्वयम्॥३॥ ॥ ॥ ॥ ॥

ति पूर्वत्र यस्य टीका॥ भवतो मनः परितोषकं चाख्यातम्॥३६॥ आमंत्र्य आपृच्छ्य यादृच्छिकः स्वप्रयोजनसंकल्पशून्यः॥
हरिकथागायकं धन्यं श्लाघते॥ अहो इति॥ ३७॥ माद्यन्हृष्यन् तंत्र्या वीणया॥३८॥ इति श्री भावार्थे प्रथमस्कं
धे षष्ठः॥६॥ प्रथ भागवते श्रोतृजन्म वक्तृपरीक्षितम्॥ सप्तमे बालवधाद्द्रोणेर्दंडः सप्तमउच्यते॥ तस्य नारदस्याभिप्रा
यं श्रुतवान्सन्॥१॥ ब्रह्मनद्यां ब्राह्मणैः सेवितायां ब्रह्मदेवमायावा स एव कर्मैव वर्धयतीति तथा॥२॥ बदरीणां समू
हेन षंडेन मंडिते मनः॥ प्रणिदध्यौ स्थिरीचकार समाधिना त्रस्मे ते नारदेनोपदिष्टं ध्यानं कृतवानित्यर्थः॥३

श्री। भाप्र। टी। २८

त्राघस्य कलाभिर्विद्धमिः ॥ आकूले स्पन्दितं यस्याः साकिं वीक्ष्य स्वैरं नेयितं तद्ग्राणां वन्हलाक्तिरीटमालीमुक्तं ॥ ५५ ॥ पुत्रः
शोकाक्रांतां प्रमदा जाग्नि यदि साग्र्यां यां स्मियं यत्र वा ग्रहस्त्र वर्षोऽर्ध्वं स्यगाय मस्यानमानायिन इति ॥ अग्निदेवानद्रक्षेत्र वशस्यपाणि
पेनापहः दोद्रुदावह हत्वेक्षेत्रं वषडेने ह्यानं नायिनः ॥ इति सत्यपातः ॥ सत्रा ननतायीया सुपाणिः तेन च पुत्र हेतुं तेन लत्यते गां
डीवाद्रुत्रघोष्यमौ विद्धिशिखैर्बाणैः कृपालुदेवेन स्नं समीपस्य पतयामि यद्धि स्वाक्रम्यासनं विधाय दृश्यपुत्र नमते ॥ ५६ ॥ वलावी
वस्याविचित्राजस्य भास्वता नितैः समन्विनैः अक्लान्त एवं स्मितेः [illegible] च यस्य दृश्चितो वद्ध कवच उग्रंयथ तस्याः पंथ स्यकपि हे
मान्धे जेयस्य सः गुरोः पुत्र वद्धो नाल्पयावत ॥ ५७ ॥ आपतंतमतुं यावत्तेसमद्वाणिः कुमार हत्वा बालयतीप्रकेपि नहदयः

न्यास्त्र तारा — उद्विग्नमनाः

मातामत्ना नां नमनं शिशूनां निशाम्य स्त्रीवेपवितप्पमाना ॥ इयानदत्तास्यकलाकुलाती तां तां वयमाह किरी
टमाली ॥ ५५ ॥ नदाश्च वनेस्तप्रदृजामि मेदेय द्दुस्मवंधोः शिवस्थानतानायिनः ॥ गां स्त्रीवसुमे विंदिशिखे कृपाह्नदेवत्वा
क्रम्य यत्स्यास्य समिदयपुत्रा ॥ ५६ ॥ इति प्रियांवलत्यविविधजलैः समंतान्वयिनां च हृन्निमिद्वमतः ॥ अन्वाइव
त हृत्सिद्ध ग्रथनाकपिधृजी गुरु पुत्रं रथेन ॥ ५७ ॥ तमापतंतं स विलत्य सूर्या कुमार वद्धो द्विग्नमना रथेन ॥ पदा
इव स्त्राणपवीप्सुरूर्व्यां यावद्भ्रमेरुद्भयाद्यथार्कः ॥ ५८ ॥

यावद्भ्रमे

प्राणापरीप्सुः प्राणं लब्धुमिच्छुर्नत्ककीर्तिः ऊर्व्यां तं शाकं तावदूर्ध्वं पलायतंको वृद्धास्सगो भूत्वा संतायवत्सु
मुच्यतः समर्कः ॥ रुद्रस्य भयाद्यथा पलायते स्म ॥ पलायनार्क इति वा पाठे ॥ वामनपुराणे कथा सूचिता ॥ तथा हि
विद्युन्माली नाम राक्षसो महेश्वरः ॥ कश्चित्तन्त्र रुद्रेण सो वर्णाविमाने दत्ते ततो सावर्कस्पष्ट[illegible] ततो भ्राम्यन्विमान
दीप्त्या [illegible] रात्रिं विलोपितवान् ॥ ततोऽर्कस्तानि ज तेजोभिर्द्रावयित्वा तद्विमानं पातितं ततस्तत्कृत्वा कुपितेन रुद्रेण भयादर्कः ॥
पराइवत ॥ ततो रुद्रस्य कृतदृष्ट्यादं दह्यमानः पतन्वाराणस्यां पतितः लोलार्क नाम्ना विख्यातो जातः ॥ ५८ ॥ राम

५८

निर्ग्रन्था ग्रन्थेभ्यो निर्गताः ॥ तदुक्तं गीतासु ॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य चेति
यद्वा ग्रन्थिरेव ग्रन्थः ॥ निर्वृत्तहृदयग्रन्थय इत्यर्थः ॥ ननु मुक्तानां किं भक्त्या इत्यादि सर्वाक्षेपपरिहारार्थमाह ॥ इत्थंभूतगुणो हरिर
ति ॥ ननु भक्तिं कुर्वन्ति नाम एतत्कुतः सम्भाव्यते कस्य किं कारणमित्याह हरेरिति ॥१०॥ अध्यगान्महदाख्यानं विष्णुजनाः प्रियाः
यस्मै तिव्याख्यानादिप्रसङ्गेन तत्सङ्गतिकामस्य इति भावः ॥ एतेन तत्सङ्गेनापि महाभागवतो भूदिति नास्य कव्याख्यानेन प्रवृत्तिकथा ।
मिति यत्सूतेनोक्तं तत्र [illegible] उक्तं यदयं महाहंसप्रोक्तो पठितः ॥ श्रावयामास तेन श्रवणकौतुकमिति तस्स ज्ञाना महाश्चर्यमित्यादि
नात सौतेर्वक्तमाह परीक्षित इति ॥११॥ विलापनं मुक्ति वासं स्याम महाप्रस्थाने श्रीकृष्णकथानामुदयो यया भवेत् ।

सूतः ॥ आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे ॥ कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः ॥१०॥ हरेर्गुणा-
क्षिप्तमतिर्भगवान्बादरायणिः ॥ अध्यगान्महदाख्यानं नित्यं विष्णुजनप्रियः ॥११॥ परीक्षितोऽथ राजर्षेर्जन्मकर्म-
विलापनं ॥ संस्थां च पाण्डुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥१२॥ यदा मृधे कौरवसृंजयानां वीरेष्वथो वीरगतिं गते-
षु ॥ वृकोदराविद्धगदाभिमर्शभग्नोरुदंडे धृतराष्ट्रपुत्रे ॥१३॥ भर्तुः प्रियं द्रौणिरिति स्म पश्यन्कृष्णासुतानां
स्वपतां शिरांसि ॥ उपाहरद्विप्रियमेव तस्य जुगुप्सितं कर्म विगर्हयंति ॥१४॥ ॥

तत्र
नितघा ॥ परीक्षितो जन्मनि तु यथि ब्रह्मास्त्रादौ नाव ... स एवाश्वत्थाम्नो ब्रह्मास्त्रात्कृष्णेन रक्षित इति तत्कथां प्रस्तौति यदे-
त्यादि ॥१२॥ यदा द्रौणिः स्वपतां द्रौपदीपुत्राणां शिरांसि उपाहरत् तदा तन्मातां रुदतीं ॥ [illegible] ॥ तां च सान्त्वयन् ।
किरीटमाली अर्जुन आह इति त्रिभिरन्वयः ॥ किमिति बालानां शिरांसि आनीतवानित्यपेक्षायामाह ॥ मृधे युद्धे यथायथं पि पा-
ण्डवानां कौरवाणां च तथापि सृंजयवंशजो धृष्टद्युम्नः ॥ पाण्डवानां सेनापतिरिति सृंजयानामित्युक्तं ॥ वीरगतिं स्वर्गगतिं प्राप्ते-
ष्वनन्तरं वृकोदरेण आविद्धा या गदा तया अभिमर्शेन भग्न ऊरुदण्डो यस्य तस्मिन् धृतराष्ट्रपुत्रे दुर्योधने
सति ॥१३॥ भर्तुर्दुर्योधनस्य प्रियं इति एवं मन्वानः ॥ इति पश्यन् तस्य तन्न हि प्रियं भवेदिति वा कथान्तरेण विप्रियत्वे हेतुः

अपि

सो.१स्मी सांवर्तकं न प्रान्त

श्री भा.प्र. टी. २२

प्रत्यवकर्षनं कृशान्तकरं निवर्तकमित्यर्थः॥ अस्त्रतेज उन्नद्धमुन्नतं ब्रह्मास्त्रतेजसैव जहि घातय॥ त्वमस्त्रज्ञं चास्त्रं तदुप
संहरमस्त्रयमेव प्राप्नोति॥ यतस्त्वमस्त्रज्ञोसि॥२७॥ परेस्त्रा ब्रह्मस्त्रेण एव वीराः सौगृह्णंतीति नयात् फल्गुनोर्जुनः आपः स्पृष्ट्वा आच
म्यतं श्रीकृष्णं परिक्रम्य प्रदक्षिणीकृत्य ब्राह्मास्त्राय ब्रह्मास्त्रस्य निवृत्तये॥२८॥ तत उभयोर्ब्रह्मास्त्रयोः तेजसी शरैः संहृते अन्यो
न्य परस्परं मिलित्वा ववृधाते॥ अर्कवह्निनी किं हुता या वायवा पृथ्वीवाय वेतविले चाह मध्ये प्रलय समये एक पर्णासुरवाग्निरूप
विस्मितः॥ अर्कस्य संहर्तव्य वर्धितेन हत॥२९॥ तयोर्द्रौण्यर्जुनयोः तेन दह्यमानाः प्रजाः प्रलयाग्निं मंसमेनिरे॥३०॥ लोकानां व्य

नह्यस्यान्यतमं किंचिदस्त्रं प्रत्यवकर्षनम्॥ जह्यस्त्रतेज उन्नद्धमस्त्रज्ञो ह्यस्त्रतेजसा॥२७॥ सूत उ॥ श्रुत्वा भगवता प्रोक्तं फ
ल्गुनः परवीरहा॥ स्पृष्ट्वापस्तं परिक्रम्य ब्राह्मं ब्राह्मास्त्राय संदधे॥२८॥ संहत्यान्योन्यमुभयोस्तेजसी शरसंवृते॥ आवृत्य
रोदसी खं च ववृधातेर्कवह्निवत्॥२९॥ दृष्ट्वास्त्रतेजस्तु तयोस्त्रील्लोकान्प्रदहन्महत्॥ दह्यमानाः प्रजाः सर्वाः सांवर्त
कममंसत॥३०॥ प्रजोपद्रवमालक्ष्य लोकव्यतिकरं च तं॥ मतिं च वासुदेवस्य संजहारार्जुनो द्वयं॥३१॥ तत आसा
द्य तरसा दारुणं गौतमीसुतम्॥ बबंधामर्षताम्राक्षः पशुं रशनया यथा॥३२॥ शिबिराय निनीषंतं रज्वा बध्वा रिपुं ब
लात्॥ प्राहार्जुनं प्रकुपितो भगवानंबुजेक्षणः॥३३॥ मैनं पार्थार्हसि त्रातुं ब्रह्मबंधुमिमं जहि॥ योसावनागसः सु
प्तानवधीन्निशि बालकान्॥३४॥ मत्तं प्रमत्तमुन्मत्तं सुप्तं बालं स्त्रियं जडं॥ प्रपन्नं विरथं भीतं न रिपुं हंति धर्मवित्॥३५॥

मुयं व्यतिकरं विनाशमित्यर्थः॥ वासुदेवस्य मतिं चालक्ष्य ब्रह्मास्त्रद्वयमुपसंहृतवान्॥३१॥ गौतमवंशजा गौतमी कृ
पीतस्याः सुतं अमर्षेण कोपेन ताम्रे अक्षिणी यस्य सः॥ निष्पत्वे दृष्टांतः॥ पशुं पश्येति तस्य बंधनं धर्म इत्यत्र दृष्टांतः॥ यथाया
ज्ञिकः पशुमिति रशनया रज्वा योगाकरोषादिव तस्यापि अर्जुनस्य धर्मनिष्ठां ज्ञापनाय श्रीकृष्णवाक्येन दाहयद्भिः॥३२
शिबिराय राज्ञे निवेदनाय नेतुमिच्छंतं प्रकुपित इति॥३३॥ अनागसो निरपराधान्॥ रिपोरपि सुप्तस्य बालस्य च वधो न यो
ग्य इत्यत्र अर्थं दर्शयति मत्तमिति॥३४॥ मत्तं मद्यादिना प्रमत्तमनवहितं उन्मत्तं ग्रहवातादिना जडं मंदं यमं प्रपन्नं शरणागतं।

श्रीभागवतटी. स्कं १ २२

४७

अशरणं त्रातारहितं न तु पलायनमेव रक्षकमस्ति न तस्यापि कुंठितत्वादित्याह ॥ श्रांता वाजिनो यस्य तं ब्रह्मशिरोसंज्ञं ब्रह्मास्त्रं द्वि
जात्मज इत्यदीर्घदर्शित्वमाह ॥१९॥ तदुक्तमस्त्रं समाहितः कृतध्यानः उपसंहारमजानन्नपि संधाने हेतुः प्राणकृच्छ्र इति ॥२०॥ त
तोस्त्रात्सर्वतो दिशं प्रकटीभूतं तेजोभिप्रेक्ष्य ततः प्राणापदमभिप्रेक्ष्याच्युतं विज्ञापयितुं प्रणमन् स्तौति ॥२१॥ संसृतेर्हेतोर्दह्यमा
नानां तस्या अपवर्गः अपवर्जयिता अस्माकं रक्ष्यर्थः ॥२२॥ यतः त्वमीश्वरः साक्षादतः त्वं अपि नः प्रकृतेः परः पुरुषः तत्कुतो यत
आद्यः कारणानां कारणात्वं विकारातीतत्वमाह ॥ मायां व्युदस्याभिभूयकैवल्यरूपे आत्मन्येव स्थित इति ॥ त्रिवर्गादानपि त्वमेव त्वा

यदाशरणमात्मानमैक्षत श्रांतवाजिनं ॥ अस्त्रं ब्रह्मशिरो मेने आत्मत्राणं द्विजात्मजः ॥१९॥ अथोपस्पृश्य सलिलं सं
दधे तत्समाहितः ॥ अजानन्नपि संहारं प्राणकृच्छ्र उपस्थिते ॥२०॥ ततः प्रादुष्कृतं तेजः प्रचंडं सर्वतो दिशं ॥ प्राणापदम
भिप्रेक्ष्य विष्णुं जिष्णुरुवाच ह ॥२१॥ अर्जुन उवाच ॥ कृष्ण कृष्ण महाबाहो भक्तानामभयंकर ॥ त्वमेको दह्यमानानामप
वर्गोसि संसृतेः ॥२२॥ त्वमाद्यः पुरुषः साक्षादीश्वरः प्रकृतेः परः ॥ मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि २२
स एव जीवलोकस्य मायामोहितचेतसः ॥ विधत्से स्वेन वीर्येण श्रेयो धर्मादिलक्षणम् ॥२४॥ तथायं चावतारस्ते
भुवो भारजिहीर्षया ॥ स्वानां चानन्यभावानामनुध्यानाय चासकृत् ॥२५॥ किमिदं स्वित्कुतो वेति देवदेव न वेद्म्यहं
सर्वतो मुखमायाति तेजः परमदारुणम् ॥२६॥ श्रीभगवानुवाच ॥ वेत्थेदं द्रोणपुत्रस्य ब्राह्ममस्त्रं प्रदर्शितं नैवासौ
वेद संहारं प्राणबाध उपस्थिते ॥२७॥ ॥

हरसीति ॥२३॥ यस्त्वं मायामभिभूय स्थितः ॥ स एव मायाभिभूतस्य जनस्य धर्मादिफलमुपासितः सन् विधत्से वीर्येण
प्रभावेन तथा चानेनावतारेणात्मनेसाधूपद्रवादिभिर्लक्ष्यते इत्याह तथेति ॥२५॥ किं भूभारहरणं मदिच्छामात्रेण न भवति
तत्राह स्वानां ज्ञातीनां भक्तानामनुध्यानाय ते ध्यानस्य भावानामेकांतभक्तानां चैव स्तवं त्वा प्रस्तुते विज्ञापयति ॥२५॥ कि
मात्मकं इदं कुतो वायातीति स्विद्वितर्के ॥२६॥ इदं द्रोणपुत्रस्य ब्रह्मास्त्रं तेन च प्राणबाधे प्राप्ते प्रदर्शितं केवलं न तत्र तस्य यो
गे कुशल इत्यर्थः ॥ यतो मात्रमुपसंहारं न वेद पतनं यस्ते वेदं जानासि ॥२७॥ ॥

यर्हिभवतः अदर्शनं यदानुमस्मान्नपश्यति तदानाम्ना विख्यातारूपेणा सह ज्ञा च यदुभिः सहिताः पांडवाः नामके वयं नके।
पिमतित्त्वच्छादसर्थः ॥ हृषीकाणामीशितुर्जीवस्यादर्शने यथानकिंचिन्नामरूपं च नतद्वत् ॥३८॥ किंचयथेदानींतथममस्या
त्याभूमिः स्वरसायावकारीर्वज्राङ्कुशादिभिर्लक्षणैर्विलक्षितैः विचिह्नैः त्वत्पदैरङ्किता सती भाति तथा त्वयिनिर्गते सति न।
शोभिष्यते ॥३९॥ अपिचइमेजनपदादेशाः स्वृद्धाः सुसमृद्धाः संतः ॥ नामने पांडवानामकुशलमसमसेन याद्वानाशिसुभ
यतोव्याकुलचित्तासती तेषु स्नेहनिवृत्तिं प्रार्थयते अथेति ॥४०॥ विश्वेशादिसंबोधनानि स्नेहच्छेदसामर्थ्यख्याप

केवयंनामरूपाभ्यांयदुभिःसहपांडवाः ॥ भवतोदर्शनंयर्हिहृषीकाणामिवेशितुः ॥३८॥ नेयंशोभिष्यतेभूमि
र्यथेदानींगदाधर ॥ त्वत्पदैरंकिताभातिस्वलक्षणविलक्षितैः ॥३९॥ इमेजनपदाःस्वृद्धाःसुपक्वौषधिवीरुधः
वनाद्रिनद्युदन्वंतोह्येधंतेतववीक्षितैः ॥४०॥ अथविश्वेशविश्वात्मन्विश्वमूर्तेस्वकेषुमे ॥ स्नेहपाशमिमंछिंधि
दृढंपांडुषुवृष्णिषु ॥४१॥ त्वयिमेनन्यविषयामतिर्मधुपतेसकृत् ॥ रतिमुद्वहतादद्धागंगेवौघमुदन्वति ॥४२॥
क श्रीकृष्णकृष्णसखवृष्ण्यृषभावनिध्रुग्राजन्यवंशदहनानपवर्गवीर्य ॥ गोविंदगोद्विजसुरार्तिहरावतारयो
गेश्वराखिलगुरोभगवन्नमस्ते ॥४३॥ सूतउवाच ॥ पृथयेत्थंकलपदैःपरिणूताखिलोदयः ॥ मंदंजहासवैकुंठो
मोहयन्निवमायया ॥४४॥ ॥

नायदृढंसंतं ॥ ततः किमत आह त्वयीति ॥४२॥ अनन्यविषया सती मे मतिः रतिमुद्वहतात्
न द्वितीयां प्रीतिं करोत्वित्यर्थः ॥ गंगा यथा ओघं समुद्रं प्रति अविच्छिन्नं गमयति एवमपि मतिविघ्नान्नगणयेदिति भावः ॥ ए
वमतिमती भक्त्या पुनः प्रणमति ॥४३॥ हे कृष्ण ते नमः उपकारानुस्मरंती बहुधा संबोधयति ॥ कृष्णसखार्जुनस
खे वृष्णीनामृषभश्रेष्ठ ॥ अवनौ ध्रुह्यंतीति ये राजन्याः तेषां वंश एव दहनानपवर्गवीर्यादीनि प्रभाव गोविंद गाः कामधे
नुर्द्विजसुराणामार्तिहरो वा तारोयस्येति ॥४३॥ कलानिमधुराणि पदानि येषु तैर्वाक्यैः परिणुतोखिलोमहिमाउदयः
यस्य सः ॥ उदस्ता विस्मयोत्पादितेनेतिवत्त्वयीदीर्घच्छिदो गुणायेन मंदं नीयत ॥ तस्या हासएव माया । तथा च वक्ष्यति हा

न

अत एव त्वगान्मोहूनतयाऽनैयतानाम्वज्जन्मादिवहुधावर्णायेनीत्याह केचिदिति चतुर्भिः ॥ अप्यस्लोकस्य प्रियस्य पुण्यश्लोकस्य कीर्त
येयदोरेव कीर्तयुरितिवा ॥ मलयस्य कीर्तयेयथा चंदनमिति निदर्शनतया ॥ २१ ॥ वसुदेवस्य भार्या यो देवकामज एवत्वम
भवाप्त ॥ पुत्रत्वमिति शेषः प्रथमपुरुषः त्वार्षः ॥ अभविमिति वैशेवा पाठः ॥ वासुदेवः ताभ्यासेव सर्वसत्वपः इति च्छुरूपाय्यात्या
चितः सत् ॥ २२ ॥ अव्यजपातः देमायानम्पुवेतित्र स्मयार्थ्मनस्पशायामविवृत्तयाम तोनम् ॥ २४ ॥ परस्मानंदरवरूपात्तान्नभवि
घातनोदेहापन्नमानात्कामः ततः कर्माणि तेः विषनो क्लिश्यमानानामिहत्तनयस्य श्रवणाद्युहाणिकर्मणि करिष्यन् ॥ अस्म

केचिदाह्व यजं जातं पुण्यश्लोकस्य कीर्तये ॥ यदोः प्रियस्यान्ववाये मलयस्येव चंदनम् ॥ २१ ॥ अपरे वसुदेवस्य दे
वक्यां याचितोभ्यगात् ॥ अजस्त्वमस्य क्षेमाय वधाय च सुरद्विषाम् ॥ २२ ॥ भारावतारणायान्ये भुवो नाव इवोदधौ
सीदंत्या भूरिभारेण जातो ह्यात्मभुवार्थितः ॥ २३ ॥ भवेस्मिन्क्लिश्यमानानामविद्याकामकर्मभिः ॥ श्रवणस्मर
णार्हाणि करिष्यन्निति केचन ॥ २४ ॥ शृण्वंति गायंति गृणंत्यभीक्ष्णशः स्मरंति नंदंति तवेहितं जनाः ॥ त एव पश्यं
त्यचिरेण तावकं भवप्रवाहोपरमं पदांबुजं ॥ २५ ॥ अप्यद्य नस्त्वं स्वकृतेहित प्रभो जिहाससि स्वित्सुहृदोनु
जीविनः ॥ येषां न चान्यद्भवतः पदांबुजात्परायणं राजसु योजितांहसाम ॥ २६ ॥

परस्परसिद्धांतनामभिप्रेत्य श्रवणादिफलमाह ॥ शृण्वंतीति ॥ २५ ॥ नंदंति श्रन्यैः कीर्त्यमानमभिनंदंति ॥ येजनाईहितं
चरितं तावकं त्वदीयं पदांबुजं त एव पश्यंति नान्ये इति च सर्वनाव धारणं ॥ कीदृशं भवप्रवाहस्य जन्ममरणप्रवाहस्योपरमो
यस्मिंस्तत् ॥ इदानीं तवास्मत्परित्यागो नुचित इत्याशयेनाह ॥ अपीति चतुर्भिः ॥ २६ ॥ हे प्रभो स्वकृतेहित त्वं जीविनः अस्मान्परित्यक्तु
मिच्छसि स्वित् जिहाससि येषामस्माकं भवतः पादारविंदात्परायणं नास्ति किं ततो राजसु योजितमहो उः खं यैस्तेषां नोस्मानकृतमीहितं यैस्तेषां
नेति संबोधितेविसर्गांतपाठे त्वे पदविशेषणं ॥ नतु नवंध्य वोयादवाः प्रवाध्य पांडवाः शूराः समर्थाश्च तत्किं कार्यं तत्राह केमे

पिप्पलिकें

न्य

[illegible] नैषधमिति ॥ ५०॥

बद्धे मुच्यते

श्री भा॰ प्र॰ २३

तेषां राजन्यानां कुलं कुरुसंकाशं भूतं सानुबंधं सपरिवारं स्यात् यो नार्पितं यान्मैत्र्य कनं कार्यं कृतं इति ॥ ४८ ॥ धर्ममिमादयो वच
सः षट्‌यणाः सर्वज्ञाकांस्यो इह्याः ॥ तेन धर्मं पूर्वादनपेन ब्राह्मणेति व्याख्या यादृह वेदेन सेवहस्य मिम्यादि ॥ ४९ ॥ सकरु
णांतस्यात्मनोधर्ममिति ॥ ३ ॥ निर्व्यलीकं तदुमेति ति ॥ ४ ॥ समभाषोऽदी विधि दुःस्व साम्येयाको ॥ ५ ॥ महतां येः कोपिततमिति निषु
रोत्राद्धितोपदेशात् ॥ ९ ॥ एवंभूतं राज्ञा वचो हे द्विजाः प्रत्यनंदत सुव्रतो दिवान् ॥ ४९ ॥ न कुलादयस्य प्रत्यनंदत ॥ युयुधा
नः सात्यकिः ॥ ५० ॥ तस्य तथा विधस्य द्रौणेर्वध एव श्रेयः ॥ श्रयथास्यानवक्रपातं श्रुतं नाराम्भदाहनमर्हतीति ॥ अदहं जया

ये कोपितं ब्रह्मकुलं राजन्यैर्वजितात्मभिः ॥ तत्कुलं प्रदहत्याशु सानुबंधं शुचार्पितम् ॥ ४८ ॥ सूतः धर्म्यं न्याय्यं सकरु
णं निर्व्यलीकं समं महत् ॥ राजा धर्मसुतो राज्ञ्याः प्रत्यनंदद्वचो द्विजाः ॥ ४९ ॥ नकुलः सहदेवश्च युयुधानो धनंजयः
भगवान्देवकीपुत्रो ये चान्ये याश्च योषितः ॥ ५० ॥ तत्राहामर्षितो भीमस्तस्य श्रेयान्वधः स्मृतः ॥ नभर्तुर्नात्मनश्चा
र्थे योऽहन्सुप्तान्शिशून्वृथा ॥ ५१ ॥ निशम्य भीमगदितं द्रौपद्याश्च चतुर्भुजः ॥ आलोक्य वदनं सख्युरिदमाह हसन्न
िव ॥ ५२ ॥ श्रीभगवानुवाच ॥ ब्रह्मबंधुर्न हन्तव्य आततायी वधार्हणः ॥ मयैवोभयमाम्नातं परिपाह्यनुशासनम् ॥ ५३
कुरु प्रतिश्रुतं सत्यं यत्तत्सांत्वयता प्रियाम् ॥ प्रियं च भीमसेनस्य पाञ्चाल्या मह्यमेव च ॥ ५४ ॥ सूतः ॥ अर्जुनः सहसा
ज्ञाय हरेर्हार्दमथासिना ॥ मणिं जहार मूर्धन्यं द्विजस्य सहमूर्धजम् ॥ ५५ ॥ विमुच्य रशनाबद्धं बालहत्याहत
प्रभम् ॥ तेजसा मणिना हीनं शिबिरान्निरयापयत् ॥ ५६ ॥

न ॥ ५१ ॥ चतुर्भुजो के रयं भावः ॥ भीमे एवं हंतं प्रहते द्रौपद्यां च स
हसा तन्निवारणोप्रयुक्ताया मुभयोः संवारणा विष्णुतः ॥ चतुर्भुजः सदिहान स सरव्युः अर्जुनस्य ॥ ५२ ॥ वृथार्हणः वधार्हो
मया एव शास्त्रकृता श्राम्नातं तस्यः तथा ॥ आततायिनमायांतं अपि वेदांतपारगं ॥ जिघांसंतं जिघांसीयान्न तेन ब्रह्महा
भवेत् ॥ इति वदता तदुभयमपि शासनमनुपालय ॥ ५३ ॥ सांत्वयता प्रतिज्ञां कुरु येति प्रियां सांत्वयिता तव यायत्प्रतिश्रुतं हननं तं
च सत्यं कुरुमह्यं मम ॥ तत्र वधे भीमस्य प्रियं भवति ॥ अवधे द्रौपद्याः स्वयं कृपालुत्वस्य ॥ ५४ ॥ हार्दं सभिप्रायमाज्ञाय ज्ञात्वाऽनं
हशाकाय भयं विदध्यात् ॥ अतो यम भिप्राय इति ज्ञात्वेत्यर्थः ॥ असिनारवडेन मूर्धजा तं सकेशं ॥ ५५ ॥ तेजसा मणिना च ॥

तद्वधो दंडरूपः तस्यैव श्रेयः पुरुषार्थः यद्यतो दंडप्रायश्चित्तरहितानां दोषात्स पुमानधो याति ॥ तथा च स्मर्यते ॥ राजभिर्धृतदं
डास्तु कृत्वा पापानि मानवाः ॥ निर्मलाः स्वर्गमायान्ति संतः सुकृतिनो यथेति ॥ ३७ ॥ तदसौ वध्यतां पाप आततायी ॥ ३९ ॥ यद्यपि
चोदितः तथापि हंतुं नैच्छत् ॥ आत्महनं पुत्रहंतारं यद्यपि तथापि यतो महान् ॥ ४० ॥ गोविंदः प्रियः सारथिर्यस्य सः आत्मजान् शोचंत्यै ॥ ४१ ॥
तथा परिभवेनाहृतं आनीतं कर्मणा जुगुप्सितेन निंदितेन हेतुना अवाङ्मुखं कृष्णायाः अपकारिणं [illegible] निरीक्ष्य वामः शोभनः स्वभा

स्वप्राणान्यः परप्राणैः प्रपुष्णात्यघृणः खलः ॥ तद्वधस्तस्य हि श्रेयो यद्दोषाद्यात्यधः पुमान् ॥ ३७ ॥ प्रतिश्रुतं च भ
वता पांचाल्यै शृण्वतो मम ॥ आहरिष्ये शिरस्तस्य यस्ते मानिनि पुत्रहा ॥ ३८ ॥ तदसौ वध्यतां पाप आतताय्यात्मबंधु
हा भर्तुश्च विप्रियं वीर कृतवान्कुलपांसनः ॥ ३९ ॥ एवं परीक्षता धर्मं पार्थः कृष्णेन चोदितः ॥ नैच्छद्धंतुं गुरुसुतं य
द्यप्यात्महनं महान् ॥ ४० ॥ अथोपेत्य स्वशिबिरं गोविंदप्रियसारथिः ॥ न्यवेदयत्तं प्रियायै शोचंत्या आत्मजान्ह
तान् ॥ ४१ ॥ तथाहृतं पशुवत्पाशबद्धमवाङ्मुखं कर्मजुगुप्सितेन ॥ निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृ
पया ननाम च ॥ ४२ ॥ उवाच चासहंत्यस्य बंधनानयनं सती ॥ मुच्यतां मुच्यतामेष ब्राह्मणो नितरां गुरुः ॥ ४३ ॥ सर
हस्यो धनुर्वेदः सविसर्गोपसंयमः ॥ अस्त्रग्रामश्च भवता शिक्षितो यदनुग्रहात् ॥ ४४ ॥ स एष भगवान्द्रोणः प्र
जारूपेण वर्तते ॥ तस्यात्मनोऽर्धं पत्न्यास्ते नान्वगाद्वीरसूः कृपी ॥ ४५ ॥ तद्धर्मज्ञ महाभाग भवद्भिर्गौरवं कुलं ॥ वृ
जिनं नार्हति प्राप्तुं पूज्यं वंद्यमभीक्ष्णशः ॥ ४६ ॥ मा रोदीदस्य जननी गौतमी पतिदेवता ॥ यथाहं मृतवत्सार्ता रोदि
म्यश्रुमुखी मुहुः ॥ ४७ ॥

वो यस्याः सा ननाम उवाच चेति ॥ चकारद्वयेन संभ्रमः सूचितः बंधनेनानयनं असहमाना ॥ ४३ ॥ सरहस्यो गोप्यमं
त्रसहितः ॥ विसर्गोऽस्त्रप्रयोगः उपसंयम उपसंहारः ॥ ताभ्यां सहितोऽस्त्रसमूहः ॥ ४४ ॥ किंच न स द्रोणो मृतः आत्मा देहस्तस्यार्धं
रूपी आस्ते ॥ अर्धं निर्दिष्टः ॥ पत्नी अर्धं [illegible] ॥ [illegible] पतिं [illegible] ॥ उभयोरे
काकारत्वात् [illegible] वीरसूः पुत्रवती ॥ ४५ ॥ तस्माद्गुरोः कुलं भव
द्भिर्गुरुभिः [illegible] वंद्यं पूज्यं च ॥ ४६ ॥ [illegible] विपदो दोषमाहयेति ॥ ४७ ॥ ॥ ९ ॥ ॥ ॥

स्कं० १ गो० ५४

त तदानीमेव ऽपीऽर्थं न प्रहर्तां

अभिद्रवति अभिद्रवत् मायाति तत्समायं तेजो दहनं प्रालंघ्युरुक्ता ॥ अतिकात्र्य ... ॥ ता मनिमिति कामं यथेद्धं मां दहत्विते मे दुःखं
गर्भमभिमानि यामस्ततः ॥ १० ॥ संत्वाद्यो यौनै वकन्ध्या ॥ यथा गर्भं वेक्ष्याति अपितस्य शोकेऽ पांडवस्तु मभिदं विषयेकत्रैव मास्वेन च
ध्यत ॥ ११ ॥ अत एव वज्रस्तुवैन दाग्निमिमुक्तं तंत्रत्रैवं ब्रह्मास्त्रस्था स्थान्ते ह वनि वर्मिन्नात ॥ १२ ॥ तंद्रष्टाविद्हरं व्यास नैर्वाद्यजनन्य
विषयद्यात्मा येषां सैक निष्ठानामित्यर्थः ॥ १३ ॥ वेदाद्दाउन्नवायाऽन्नतः स्थः भूतगर्भस्वाहं त्वदान ॥ तन्वे हेतं यंतं आत्मा अन्त
यामीयो गेश्वर इति वहिः स्थ्यस्यापि अवेक्षात्र त्वेना थीत्युते उत्पद्योता तन्न वेत्तानां मा यथा पांडवानामपि ऊ त्वं प्राजत्वादेवसं

अभिद्रवति मामीश शरस्तप्तायसो विभो ॥ कामं दहतु मां नाथ मा मे गर्भो निपात्यताम् ॥ १० ॥ सूत उवाच ॥ उपधार्य वचस्तस्या
भगवान्भक्तवत्सलः ॥ अपांडवमिदं कर्तुं द्रौणेरस्त्रमबुध्यत ॥ ११ ॥ तर्ह्येवाथ मुनिश्रेष्ठ पांडवाः पंच सायकान् ॥ आ
त्मनोभिमुखान्दीप्तानालक्ष्यास्त्राण्युपाददुः ॥ १२ ॥ व्यसनं वीक्ष्य तत्तेषामनन्यविषयात्मनाम् ॥ सुदर्शनेन स्वास्त्रे
ण स्वानां रक्षां व्यधाद्विभुः ॥ १३ ॥ अंतःस्थः सर्वभूतानामात्मा योगेश्वरो हरिः ॥ स्वमायया वृणोद्गर्भं वैराट्याः कुरुतंत
वे ॥ १४ ॥ यद्यप्यस्त्रं ब्रह्मशिरस्त्वमोघं चाप्रतिक्रियम् ॥ वैष्णवं तेज आसाद्य समशाम्यद्भृगूद्वह ॥ १५ ॥ मा मंस्था ह्येत
दाश्चर्यं सर्वाश्चर्यमयेऽच्युते ॥ य इदं मायया देव्या सृजत्यवति हंत्यजः ॥ १६ ॥ ब्रह्मतेजोविनिर्मुक्तैरात्मजैः
सह कृष्णया ॥ प्रयाणाभिमुखं कृष्णमिदमाह पृथा सती ॥ १७ ॥ श्रीकुंत्युवाच ॥ नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परम्
अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितम् ॥ १८ ॥ मायाजवनिकाच्छन्नमज्ञाधोक्षजमव्ययम् न लक्ष्यसे मूढदृशा नट

तं ॥ १४ ॥ अमोघमप्रतिक्रियं च समशाम्यत् शांतमासीत् ॥ १५ ॥ एतदुक्तास्त्रशामनं आश्चर्यं मा मंस्थाः मामन्यस्य ॥ १६
कृष्णया सह ॥ १७ ॥ तावन्नमस्ये नमस्करोमि नत्तु कनिष्ठं मां नमस्करोषि यासः ॥ आद्यं पुरुषं कुतः प्रकृतेः परं तन्वतः ईश्व
रे प्रकृतेरपि नियंतारं ॥ अत एव सर्वभूतानामंतर्बहिश्च पूर्णत्वेनावस्थितं तथाप्यलक्ष्यं नत्वहेतुमाह मायेति ॥ १८ ॥ मायैव
जवनिका तिरस्करिणी तया छन्नमतो हमज्ञा भक्तियोगानभिज्ञा [illegible] केवलं नमस्यामि ॥ अधोक्षजं ज्ञानेयस्मात्तमथोत
अन्वययम अपरक्षिन्तेन त्वप्रपंचः ॥ मूढदृशा देहाभिमानिना [illegible] लक्ष्यसे ॥ १९ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इति कथं अधः

१ वपनमिति ५७ निर्हरणादाद्यार्थेनयत्नं ॥५८॥ इतिश्रीभावार्थेप्रथमस्कंधे सप्तमोऽध्यायः ॥७॥ अथ मे कुपिता द्रौणेरस्त्राद्रक्षापरीक्षितः श्रीकृष्ण श्री
स्तुतिः कुंत्या राज्ञः शोकस्य कीर्यते ॥ ते पांडवाः संपरेतानां स्वानां तानां या यादुदकं दातुं सकृष्णाः कृष्णेन सहिताः स्त्रियः पुरस्कृ
त्य ययुः ततः कृत्वा तस्मिन्कार्ये स्त्रीपुत्र स्मरन्त विधिनाम ॥ ॥ निनीयोदकं हरिपादाब्जरजोभिः पूता या सरित् गंगा तस्यां जले
पुनर्ग्रहणादादाय पि स्नानं गमन ॥ २ ॥ कुरुपतिं युधिष्ठिरं सानुजं भीमादिभिः सहितं ॥ ३ ॥ मुनिभिः सहितः ॥ ४ ॥ कितवैर्हृ
इति
वपनं द्रविणादानं स्थानान्निर्यापणं तथा ॥ एष हि ब्रह्मबन्धूनां वधो नान्योऽस्ति दैहिकः ॥५७॥ पुत्रशोकातुराः सर्वे पां
डवाः सह कृष्णया ॥ स्वानां मृतानां यत्कृत्यं चक्रुर्निर्हरणादिकम् ॥५८॥ इति श्रीभागवते प्रथमस्कंधे सप्तमोऽध्या
यः ॥७॥ सूत उवाच ॥ अथ ते संपरेतानां स्वानामुदकमिच्छतां ॥ दातुं सकृष्णा गंगायां पुरस्कृत्य ययुः स्त्रियः ॥१॥ ते निनीयोद
कं सर्वे विलप्य च भृशं पुनः ॥ आप्लुता हरिपादाब्जरजःपूतसरिज्जले ॥२॥ तत्रासीनं कुरुपतिं धृतराष्ट्रं सहानुजम् ॥
गांधारीं पुत्रशोकार्तां पृथां कृष्णां च माधवः ॥३॥ सांत्वयामास मुनिभिर्हतबंधून्शुचार्पितान् ॥ भूतेषु कालस्य
गतिं दर्शयन्नप्रतिक्रियां ॥४॥ साधयित्वाजातशत्रोः स्वं राज्यं कितवैर्हृतं ॥ घातयित्वासतो राज्ञः कचस्पर्श
क्षतायुषः ॥५॥ याजयित्वाश्वमेधैस्तं त्रिभिरुत्तमकल्पकैः ॥ तद्यशः पावनं दिक्षु शतमन्योरिवातनोत् ॥६॥ आमं
त्र्य पांडुपुत्रांश्च शैनेयोद्धवसंयुतः ॥ द्वैपायनादिभिर्विप्रैः पूजितैः प्रतिपूजितः ॥७॥ गंतुं कृतमतिर्ब्रह्मन्द्वारकां
रथमास्थितः ॥ उपलेभेऽभिधावंतीमुत्तरां भयविह्वलां ॥८॥ पाहि पाहि महायोगिन्देवदेव जगत्पते ॥ नान्यं त्व
दभयं पश्ये यत्र मृत्युः परस्परम् ॥९॥
मैत्रेयो धनादिभिर्द्वैपायनाः क
चग्रहणादिभिः हतं नष्टमायुर्येषां तान् ॥५॥ या
जयित्वा तमादिभावि कयासे तेषः शतमन्योः शतक्रतोरिव ॥६॥ शैनेयः शिनेर्नप्ता सात्यकिः ॥ तेन उद्धवेन च संयुतः र
थमास्थितः सन् ॥७॥ उत्तरां परीक्षिन्मातरं अभिमुखं धावंतीमुपलेभे ददर्श ॥८॥ उत्तरा श्रीकृष्णं प्रार्थयती पाहि पा
हीति द्वाभ्याम ॥ अमरत्वप्रार्थमायोगयोनात्वत्तोऽन्यादृक्तन्न ते मम भयभयरहितं न पश्यामि यत्र लोके परस्परं मृत्युः
मरणं भवति तत्र अस्तं भयमावेदयति यत्र अभिद्रवतीति ॥९॥ ॥राम ॥
श्री
५८

श्री भाग॰ टी॰ २५ नमस्तत्कुलेत्समादिभिरेधमानो मदोयस्य सः॥ अकिंचनानां श्रीकृष्णगोविंदेतिवत्कृत्वाप्यकिंचनानामेवाचरं विषयभूतं प्रसन्नं तस्मै नो
रयस्तूवरागाय प्रणमतिनमस्यति॥२७॥ अकिंचनानामसता एव विंडसर्वं वित्तं यस्य तस्मै ननः कुतो निवृत्ता योधर्मार्थकाम विषयायतसमा
तत्र सेकुत आत्मारामाय॥ नन्वतः शान्ताय वामादिरहिताय किं केवलस्य पतये केवलदातसमर्थाय॥२७॥ नन्वहं देवकीपुत्रं सा
कथमेवं स्तोषि तत्राह मन्ये त्वामिति॥ मन्ये त्वां कालं न तु देवकी पुत्रं तत्र हेतुः ईशानं विवेयं तारे अनादिनिधनं आद्यंतशून्यं वि
भुं समं यथा भवति॥ तथा सर्वत्र चरंतं॥ ननु पार्थसारथेः कथं समता अत्र तत्राह॥ यद्यतः त्वत्तो निमित्तभूतात्॥ भूतानां मिथ

प्र॰ अजेन्नैस्वर्यस्कृत श्रीभिरेधमानमदः पुमान्॥ नैवार्हत्यभिधातुं वै त्वामकिंचनगोचरम्॥२६॥ नमो किंचनवित्ताय नि
वृत्तगुणवृत्तये॥ आत्मारामाय शान्ताय कैवल्यपतये नमः॥२७॥ मन्ये त्वां कालमीशानमनादिनिधनं विभुं समं
चरंतं सर्वत्र भूतानां यन्मिथः कलिः॥२८॥ न वेद कश्चिद्भगवंश्चिकीर्षितं तवेहमानस्य नृणां विडंबनं न यस्य
कश्चिद्दयितोस्ति कर्हिचिद्द्वेष्यश्च यस्मिन्विषमा मतिर्नृणां॥२९॥ जन्म कर्म च विश्वात्मन्नजस्याकर्तुरात्मनः
तिर्यङ्नृषिषु यादस्सु तदत्यन्तविडंबनं॥३०॥ गोप्याददे त्वयि कृतागसि दाम तावद्या ते दशाश्रुकलिलांजनसं
भ्रमाक्षं वक्त्रं निनीय भयभावनया स्थितस्य सा मां विमोहयति भीरपि यद्बिभेति॥३१॥ ॥८॥ ॥ ॥

यः कलिः कलहो भवति॥ न तु त्वत्तः त्वयि वैषम्यं न तु निग्रहानुग्रहरूपं प्रपिसयि वैषम्यं प्रसिद्धं मतत्राह न वेदेति २८
यः कलिः कलहो भवति॥ मतत्वतः त्वयि विषम्यं न तु निग्रहानुग्रहरूपं वैषम्यं निग्रहरूपा भवति॥२९॥ अजस्य जन्म अ
तत्र णां विडंबनमनुकरणमीहमानस्य कुर्वतः यस्मिंस्त्वयि विषमा मतिरनुग्रहनिग्रहरूपा भवति॥२९॥ अजस्य जन्म अ
कर्तुः कर्म तिर्यक्षु वराहादिषु नृषु रामादिषु ऋषिषु वामनादिषु यादस्सु मत्स्यादिरूपेण न रविडंबनमत्याश्चर्यमित्याह गोप्येति॥३०॥ गोपी यशोदा
त्वयि कृतागसि दधिभांडस्फोटनं कृतवति यावद्दाम रज्जुमादद्ये जग्राह॥ तावत्तन्नामेव यातेदशावस्था सा॥ सा मां वि
मोहयति॥ किंभूतं तस्यास्तु कलिलं व्याप्तमिश्रं अंजनं ययोस्ते च ते सम्भ्रमेण व्याकुले अक्षिणी यस्मिंस्तद्वक्त्रं निनी
य अधः कृत्वा ताडयिष्यतीति॥ अत एव भयस्य भावनया स्थितस्य यद्यत स्वतः भीरपि स्वयं भीतो भवति तस्य ते दशा॥२॥ २५

नन्तु रामादिरूपेण अजस्र विष्णुवामनादिरूपेण विभेति

अथ

नाना १ विधातुं २ स्त्रियः

किंच परमहंसानामात्मविवेकिनां ततो मुनीनां मननशीलानामपि ततश्चामलात्मनां निवृत्तरागादीनामपि तथा तेन निजमा
हिम्ना नलब्धस्से ॥ अतो भक्तियोगं विधातुं तानर्वयं कथं हि पश्येम यत्परमहंसानामपि भक्तियोगविधानार्थं त्वामुना आ मा
याः मप्यविरमनिजगुणैराकृष्य भक्तियोगं कारयितुमवतीर्णोसि इत्यर्थः ॥ २० ॥ ज्ञानभक्तो वक्ष्या न मस्करोत्येव पुनः केवलं नमस्क
रोति श्रीकृष्णायेति द्वाभ्यां ॥ २१ ॥ पंकजं नाभौ यस्य पंकजानां माला हृदि यस्य पंकजवन्नयने यस्य पंकजाङ्कितौ अङ्घ्री य
स्य तस्मै तुभ्यं तोपकारमनुस्मरति यथेति द्वाभ्यां ॥ २२ ॥ अयमर्थः यतः तापि मयापि काननमीति ॥ तथा हि हे हृषीकेश यथा
देवकी कंसेन रुद्धा त्वया विमोचिता ॥ अन्नाहं च तथैव किं मोचिते तेतिकाश्चा महाविपद्भ्यः ॥ तं विपदो दर्शयति सांति चि

तथा परमहंसानां मुनीनाममलात्मनां ॥ भक्तियोगविधानार्थं कथं पश्येमहि स्त्रियः ॥ २० ॥ कृष्णाय वासुदेवाय
देवकीनंदनाय च ॥ नंदगोपकुमाराय गोविंदाय नमो नमः ॥ २१ ॥ नमः पंकजनाभाय नमः पंकजमालिने ॥ नमः
पंकजनेत्राय नमस्ते पंकजांघ्रये ॥ २२ ॥ यथा हृषीकेश खलेन देवकी कंसेन रुद्धातिचिरं शुचार्पिता ॥ विमोचि
ताहं च सहात्मजा विभो त्वयैव नाथेन मुहुर्विपद्गणात् ॥ २३ ॥ विषान्महाग्नेः पुरुषाददर्शनादसत्सभाया वन
वासकृच्छ्रतः ॥ मृधे मृधेनेकमहारथास्त्रतो द्रौण्यस्त्रतश्चास्म हरेभिरक्षिताः ॥ २४ ॥ विपदः संतु नः शश्वत्तत्र तत्र ज
गद्गुरो ॥ भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥ २५ ॥ ॥

वं रुद्धा सती तस्मादेवसहद्विमोचिता ॥ तथा च शुचार्पिता च सती न च तस्याः पुत्रा रक्षितास्त्वपि च अहो नाथ सन्तः स्वां स्विमवेति
न किं तत्र ॥ एवं तत्राहं ॥ अहं तु विपद्गणात्तेन मापि मुहुः पीडिता सात्मजा च त्वयैव नाथेनेति विपद्गणमेव दर्शयति ॥ २३ ॥ वि
षात् भीमस्य विषसर्पसंदंशनात् ॥ महाग्नेर्जतुगृहदाहात् ॥ पुरुषादा हिडिंबादयो हि राक्षसाः ॥ तेषां दर्शनात् ॥ असत्सभा
याः द्यूतस्थानात् ॥ अभितो रक्षिता सर्वभावा अस्मा ॥ २४ ॥ यतस्तासु विपत्सु कीदृशं दर्शनं नास्ति पुनरपि भवदर्शनं यस्मा
त् अथवा अपुनर्भवं मोक्षं दर्शयति नित्ययस्मात् ॥ नतु संपत्स्वेवं परमेश्वरदर्शनं कुमतेस्वस्य चित्तत्वात् ॥ तत्किं विपदः प्रार्थ्य

धृ तत्र के

पुत्रेषु संवधो भवतु नाम स धर्मः स्त्रीणां तु मया हतानां बंधवो याभ्यो यो द्रोहो उत्थितः तं व्यपोहितुं प्रायश्चित्तं कल्पः सम-
र्थो नाहं गृहमेधीयैर्गृहाश्रमविधिविहितैः ॥ ननु च सर्वपाप्मानं तरति ब्रह्महत्यां योश्वमेधेन यजते य उ चैनमेवं वेदेति श्रु-
तेः ॥ पापसंघमेधेन नश्यत्येव दृष्या शंक्याविवेकविजृंभितमेव हेतुवाद्दृष्टाश्रमनिरोतियथेति ॥५१॥ यथा पंकेन पंका-
भो न सभ्यते यथा वा सुरालेपकृतं मद्यगंधं सुरया वा न स्वयं तथैवैकां भूतहत्यामज्ञात प्रमादतो ज्ञानतो बुद्धिपूर्वहिंसाम्

स्त्रीणां मद्धतबंधूनां द्रोहो यो सा विहोत्थितः ॥ कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ॥५२॥ यथा पंकेन पंका-
भः सुरया वा सुराकृतं ॥ भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥५३॥ इति श्रीभागवते प्रथमस्कंधेऽष्टमोध्यायः ॥
सूतः ॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया ॥ ततो विनशनं प्रागाद्यत्र देवव्रतोपतत् ॥१॥ तदा ते भ्रातरः सर्वे
सदश्वैः स्वर्णभूषितैः ॥ अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्तदा ॥२॥ भगवानपि विप्रर्षे रथेन सधनंजयः
स तैर्व्यरोचत नृपः कुवेर इव गुह्यकैः ॥३॥ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं ॥ प्रणेमुः पांडवा भीष्मं सा-
नुगाः सह चक्रिणा ॥४॥ तत्र ब्रह्मर्षयः सर्वे देवर्षयश्च सत्तम ॥ राजर्षयश्च तत्रासन्द्रष्टुं भरतपुंगव-
म् ॥५॥ पर्वतो नारदो धौम्यो भगवान्बादरायणः ॥ बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ वसिष्ठ इंद्रप्रमदः
त्रितो गृत्समदोसितः ॥ कक्षीवान्गौतमोत्रिश्च कौशिकोथ सुदर्शनः ॥७॥ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोमलाः
शिष्यैरुपेता आजग्मुः कश्यपांगिरसादयः ॥८॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः ॥ पूजयामास धर्मज्ञो दे-
शकालविभागवित् ॥९॥

यैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हतीति ॥५२॥ इति श्रीभावार्थप्रथमेऽष्टमः ॥८॥ युधिष्ठिराय भीष्मेण सर्वधर्मनिरूपणं ॥ कृष्ण-
स्तुतिस्तु मुक्तिश्च नवमे तस्य वर्ण्यते ॥ यद्यपि श्रीकृष्णेन तस्याविवेको वर्धितः तद्दर्शयति इतीति सर्वेषां धर्माणां विवित्सया
वेदितुमिच्छया विनशनं कुरुक्षेत्रं देवव्रतो भीष्मः ॥१॥ सदश्वैः श्रेष्ठाश्वैः स्वार्थेषु ते रथैः ॥२॥ तत्र तदा तत्रासंस्तत्प्राणमेवागता इ-
मर्षः ॥ भरतपुंगवं भीष्मं ॥५॥ रेणुकासुतः परशुरामः ॥६॥ कौशिको विश्वामित्रः ॥७॥ ब्रह्मरातः शुको आंगिरसो बृहस्प-

त्वयि मेनमविषयामतिरिति यस्मार्थितं न ह्यहं सिंसंयोक्ष्य स रथस्यानाहं जंसाक्षय सागतः पश्चात्तापयामास श्रमभद्राः प्रभुत्वा:
स्त्रियउपामंत्र्यात्तत्ताप्रस्वपुरं यास्य स्वयुधिष्ठिरगाप्रेमणा तैवकं चित्कालं निवसनेति संश्राप्य निवर्तितः ॥ अथ भीष्मनियोगान्महो
त्सवं व कृत्वोपाहूतान कस्याप्रस्तोति ॥ ४५ ॥ व्यासाद्यैः प्रतिबोधितो पिष्प्रवाचामः संताप्य प्रत विवेकेनापक तद्दीर्घवेहयातैः स्व
भक्तभी ष्मनियोगान्महोत्सवाय राज्ञा सहकृतकेवेयातयन सुखेनायं सबायनी यशतिर्द्रुपारामिश्राय ॥ कार्यहयविज्ञापकः ॥
तमज्ञानहिविमर्थ ॥ श्रीकृष्णसेनापिइतिहासैः प्रबोधितो नानुध्यत ॥ तत्रहेतुः श्रुतनकर्मणायथाकुरुपांडवसंयानार्थयतो ॥
पिययो चितमेव वदन्नपि विग्रहमेव कृष्णीकृतवानुरणमत्रापि बोधयत्त्रबोधमेव तूष्णीं चकारेत्यर्थः ॥ प्रबोधमेव प्रपंचयति ष
ड्भिः ॥ ४९ ॥ प्राह तेनाविवेकव्यासे नात्म नाचितेनदेहविशाः ॥ ५० ॥ पारक्यंस्यरजालायाहावरसदेहस्यार्थेसमयाश्रितो हितपा

तत्राण मिथ्यापामंमयविषयगजसाहसम ॥ स्त्रियश्च स्वपुत्रंधाम्य सप्रेमणा राज्ञा निवारितः ॥ ५८ ॥ व्यासाद्यैर्वीरबेद्य
नैः कृष्णेनाद्भुतकर्मणा ॥ प्रबोधितोपीति हासैर्नाबुध्यत प्रचादितः ॥ ५० ॥ आहराजा स्वधर्मस्थं तस्थितं धर्मसंदा
वयम ॥ प्राह तेनात्मना विशाः स्नेहमोहवशात्मतः ॥ ५१ ॥ अहो मेपश्यतां जानेहादितृप्तेऽवात्मनः ॥ पारक्यैस्यैव
देहस्यवद्धमनेतोहिणीहता ॥ ५२ ॥ बालहिजसहस्तमित्रपितृमातृगुरुद्रुहः ॥ नमेस्यान्निरयान्मोक्षोऽस्य
पिवर्षशतायुतैः ॥ ५३ ॥ नैनोराज्ञः प्रजाभर्तुर्धर्मयुद्धेवधोद्विषां ॥ इतिमे नतबोधाय कल्पतेशासनं वचः ॥ ५०

हताः ॥ अक्षौहिणीप्रमाणं श्रीव्यासेनोक्तं मत्स्यौहिणीप्रसंख्यानावधानां द्विजसत्तमाः ॥ संख्यागणितत्तत्त्वज्ञैः सहस्राण्ये
कविंशतिः शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः ॥ गजानां च प्रमाणं व्यानमेतावद्दिव्यकीर्तितं ॥ ज्ञेयंशतसहस्रं तत्सहस्रा ॥
णि नवैव तु ॥ नराणामपि पंचाशच्छतानि त्रीणि चैव हि ॥ पंच षष्टिसहस्राणि तथाश्वानां शतानि च दशोत्तराणिषट्प्राहुः स
र्व्यानत्त्वविदोजनाः ॥ एतामक्षौहिणींप्राहुर्यथावदिह संख्ययेति ॥ ५८ ॥ सुहृदः संबंधिनः मित्राणि सखायः पितरः पितृव्याः
स्वसमनुजास नाप्युद्देनंदो पघ्नति येन्तहेतुः नोराजइति ॥ ५५ ॥ द्विषांवध एनः पापमत्रवनीतिवत प्रासंगितातृयंवचः कृतो
नकल्पतेबोधाय ॥ तद्वचः प्रजाभर्तुर्वितनद्योत्सोनः ॥ अत्र भावः स्वप्रजास्तमनोवयेश्मकृतेउयथयेन प्रज्ञायां पाल्य

मानहानिगोनृपज्ञानलोकीयविहितहमवि ५५

पि

श्री॰ भाग॰ टी॰ २८

एष एव भगवान् सर्वेश्वरः ॥ [illegible] यत आद्यः ॥ पुमान् न तु तत्स्वयं तो नारायणः साक्षात् ॥ तदुपपादयति अस्येति ॥ १९ ॥ अनुभा
वं प्रभावं ॥ १९ ॥ तवसंज्ञानायमेवमन्यसे यमन्यसे मातुलेयं देवकीसुतं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्तारं सुहृत्तममुपका।
रानपेक्षोपकारकं च ॥ सौहृदादिति सारथिं ॥ सारथिं प्रकरोः कृतवानसि ॥ सचिवं मंत्रिणं च ॥ नन्वीश्वरः चेत्कथमेवं सेवाव
मादौ प्रवृत्तः ॥ तत्राह सर्वेति ॥ २१ ॥ तत्कृतं नीचोच्चकर्मकृतं मम योग्यमयोग्यमिति मतेर्वैषम्यं क्वचिदपि नास्ति कुतो निरव
द्यस्य रागादिदोषरहितत्वात् अनहंकृतेः तत्कृतं अद्वयस्य तदपि कुतः समदृशः ॥ तत्रापि हेतुः सर्वात्मनः यथेष्टं वा हेतं

तस्य

एष वै भगवान्साक्षादाद्यो नारायणः पुमान् ॥ मोहयन्मायया लोकं गूढश्चरति वृष्णिषु ॥ १८ ॥ अस्यानुभावं भ
गवान्वेद गुह्यतमं शिवः ॥ देवर्षिर्नारदः साक्षाद्भगवान्कपिलो नृप ॥ १९ ॥ यं मन्यसे मातुलेयं प्रियं मित्रं सुहृत्त
मम् ॥ अकरोः सचिवं दूतं सौहृदादथ सारथिं ॥ २० ॥ सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः ॥ तत्कृतं मति
वैषम्यं निरवद्यस्य न क्वचित् ॥ २१ ॥ तथाप्येकांतभक्तेषु पश्य भूपानुकम्पितं ॥ यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो
दर्शनमागतः ॥ भक्त्यावेश्य मनो यस्मिन्वाचा यन्नामकीर्तयन् ॥ त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ २३ ॥
स देवदेवो भगवान्प्रतीक्षतां कलेवरं यावदिदं हिनोम्यहं ॥ प्रसन्नहासारुणलोचनोल्लसन्मुखाम्बुजो ध्यानप
थश्चतुर्भुजः ॥ २४ ॥ ॥ ५ नुकंपा

हेतं मद्भावः ॥ २१ ॥ तथापि समत्वेऽपि हे भूप ॥ अनुकंपितं यतो मे प्राणांस्त्यजतः ॥ साक्षात्स्वयमेव न तु विद्वादिरूपेण ॥ उदा
नीदेहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते भक्त्येति द्वाभ्यां ॥ २२ ॥ यावदिति विलंबयोतयति अहं हिनोमि त्यजामीति
स्यात् तमभिदद्दृश नात्मतनज्ञानं प्रसन्नहासेनारुणालोचनाभ्यां चोल्लसत् चिरं मुखांबुजं यस्य ध्यानस्य पंथा विषयः ॥
योग्यैः चिंत्यमतेकेवलं सोऽग्रतः स्थितः सन्नोऽप्रतीत नाम्नि स्पर्धः ॥ २३ ॥ तत्रापि चतुर्भुज एव वैकुंठनिवासी भक्तिसंतापु।
हारी हरिरेव अर्जुनस्य सारथिर्वा भवतु ॥ यत्किमपि ब्रह्म तत्तत्त्वं न दृष्टमशक्यत्वात् ॥ भक्तानां सेवसेवकभावातिरिक्त
न हि किमप्यादरणीयमिति भावः ॥ २४ ॥ ॥ राम ॥ २८

सो

हृदिस्थं संतं उरत स्त्रासीनं पूजयामास ॥१०॥ उपासीनात्समीपे विष्टास्य स्यायो विनयः प्रेमस्नेहस्ताभ्यां उपसन्नात्संगतान् पा
ंडवान् स्तेष्ववनतान् स्वाचष्टाभ्य भाषत ॥ अत्र वा वासे:- स्नेहास्तु मिवस्थीभूतेन चक्षुषा पललितो दर्शितिवा ॥ अभिभाषणमाह स्व
हो इत्येकादशभिः ॥११॥ हे धर्मनंदनाः क्लिष्टं यूयं भवति ॥ एवं जीवितं नार्हथ यूयमिति यदेतद्दृष्टोकहं ज्ञापितं अहो ॥
अस्याख्या चेतत ॥ यतो यूयं विप्रधर्मी ज्ञानतत्त्वाश्रयाश्च यांति ॥१२॥ किंच संस्थितेषु तेषु बालाः प्रजाः यस्मात्तावयूयमिति देयमद
र्शितं ॥ तोकान्यपत्यानित इतीश्वरो हीः सह लोकपालाधोवा मर्थः ॥ कालं हतं तेन शोकं वा रयति सर्वमितिद्वाभ्यां ॥१३॥ भवता

हृत्स्थं च तस्य भावज्ञस्त्वासीनं जगदीश्वरम् ॥ हृदिस्थं पूजयामास मायया पात्तविग्रहम् ॥१०॥ पांडुपुत्रानुपासीना
न्प्रश्रयप्रेमसंगतान् ॥ अभ्याचष्टानुरागास्रैरंधीभूतेन चक्षुषा ॥११॥ अहो कष्टमहोन्याय्यं यद्यूयं धर्मनंदनाः ॥
जीवितं नार्हथ क्लिष्टं विप्रधर्माच्युताश्रयाः ॥१२॥ संस्थिते तिरथे पांडौ पृथा बालप्रजा वधूः ॥ युष्मत्कृते बहून्
क्लेशान्प्राप्ता तोकवती मुहुः ॥१३॥ सर्वं कालकृतं मन्ये भवतां च यदप्रियम् ॥ सपालो यद्वशे लोको वायोरिव
घनावलिः ॥१४॥ यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः ॥ कृष्णोऽस्त्री गांडिवं चापं सुहृत्कृष्णस्ततो विपत् ॥ १५
न ह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितं ॥ यद्विजिज्ञासया युक्ता मुह्यंति कवयोऽपि हि ॥१६॥ तस्मादिदं दैवतं
त्रं व्यवस्य भरतर्षभ ॥ तस्यानुविहितोनाथानाथ पाहि प्रजाः प्रभो ॥१७॥ ॥ ॐ तस्मै रामात्मने नमः ॥

मपि यद्वशे यस्य कालस्य वशवर्ती लोकः स कालश्चाहो दुर्घटनापटुः काल इत्याह यत्रेति ॥१४॥ श्रीकृष्णः अर्जुनोऽस्त्री
यत्रीतत स्तत्रापि विपत् ॥ एवमपरोक्षेण बलशास्त्रेण तपसा स्ववेदसंपन्नावपीत्यर्थः ॥ नत्वस्माकं कथं कालोतिक्रामेत् इ
त्यपेक्षयामाह ॥१५॥ नह्यस्य श्रीकृष्णस्येति ईश्वरत्वान्निर्दिशति ॥ विधित्सितं विधातुमिष्टं यस्य विधित्सितस्य विजिज्ञा
सया कवयोपि मुह्यंतीति ॥१६॥ दैवतंत्रं ईश्वराधीनं व्यवस्य निश्चित्य तस्माद्विहितोऽनुवर्ती सन् ॥ कर्तविकः ॥ हे
नाथ कुलपरंपरागतत्वात्स्वामिन् प्रभो समर्थ अनाथाः प्रजाः पाहि प्रजा अनुवर्तनीयमित्यर्थः परमेश्वरः श्रीकृष्ण एवेत्याह ॥१७॥

त्रविधेय कर्त्ते

श्री
भाप्र
टी
४९

स्मान्नस्मिन् ॥ यम ॰ पेत्वा यन्यमहत्वं नास्तीत्यर्थः ॥ तदेव परमैश्वर्यमाह स्वसत्वं स्वरूपभूतं परमानंदस्वरूपं तेप्रामवमेव
कांचित्कदाचिदिह तेविक्रीडितं फकुलितपेयुषि स्वीकृतवति नवस्वरूपनिरोधाने नज्ञीवत्वमारतेऽत्मित्यर्थः ॥ विहरतिमिस्र
कंपयेच्च यतियधेतः प्रकृतेः भवप्रवाहः स्वत्त्विपूरं पराभवति ॥ १४ ॥ स्वात्मनो श्रीकृष्णस्मृतिर्विवार्य न तिप्रार्थयते ॥ त्रिभुवनक
मनं त्रिलोकामेकमेवयत्नमनी येनहृपुर्दयाने रतिमेस्तनमाल व नीलवर्णीयस्यतत ॥ प्रातः कालीनाम वेः करा इवस्व
तएव गोरेपी तत्रमले निर्मलं ग्रवरयस्मितत पलकंडले ॰ प्राहेतेन्नाननाऽन्न युस्मिन्नतविजयसवेपार्थसारथो।
ऋनवयाहेतकोफलाभिसंधिविहितावतिरस्तविजयमस्विलामनवर्णायिनूरतिप्रार्थयते ॥ १५ ॥ युधिष्ठिरेतरणानां खुरर
जस्तरणारजसेनविधूम्रा धूम्रास्तचनेविषकालमंततः चलंतः कचाः कुंतलाः नैर्लुलितं विकीर्णाश्रमवारि स्वेदविंदु।

त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने ॥ वपुरलककुलावृताननाब्जं विजयसखे रतिरस्तुमेन
वद्या ॥ १६ ॥ युधितुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये ॥ ममनिशितशरैर्विभिद्यमानत्व
चिविलसत्कवचेस्तु कृष्ण आत्मा ॥ १७ ॥ सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य ॥ स्थि
तवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु ॥ १८ ॥ ॥ ॐ श्री रामाय रामचंद्राय नमः ॥ ॥

रूपं तेन भक्तवात्सल्यद्योतकेनालंकृतमास्यं यस्य तस्मिन् श्रीकृष्णे ममात्मा साभिनोऽस्तु रमतामित्यर्थः ॥ पुनः किंभूते
मर्दीयैः तीव्रैः शरैः विभिद्यमाना त्वग्यस्य शरीरे वविलसत्कवचं यस्य तस्मिन् ॥ १७ ॥ सेनयोरुभयोर्मध्ये रथं स्था
पय मेऽच्युत ॥ यावदेतान्निरीक्षेऽहं योद्धुकामानवस्थितान् ॥ इति सख्युरर्जुनस्य वचो निशम्य सपदि तत्क्षणमेव स्वपर
बलयोः ॥ सेनयोर्मध्ये स्थिते पार्थसखे रतिरस्तु तत्र स्थित्वा कृतं सख्यं दर्शयति ॥ परस्पर योधिनः सैनिकानामायुर।
तणा कालदृष्ट्या हृतवति भीष्मद्रोणप्रमुखतः सर्वेषां महीक्षितामिति ॥ इति तत्रस्वदर्शनमात्रेणैव सर्वेषामायुराकृष्यार्जुनेन स
जये कृतवति न केवलमर्जुनस्य यशोऽप्युहरणेनैव जयमावहत् ॥ किं तर्हि द्वियाहरणेनापीत्याह ॥ १८ ॥

राम ॥ राम ॥ राम ॥ राम ॥ राम

सपत्नी

तस्मात्तु कंपं वा कामाकर्ण्य ॥ २५ ॥ पुरुषस्वभावेन विहितान्वर्णजातिसाधारणान्धर्मान्वर्णयामासेति तृतीयेनान्वयः यथावर्णं
वर्णधर्मान् ॥ यथाश्रममाश्रमधर्मान् ॥ वैराग्यरागाभ्यामुपाधिभ्यां क्रमेणाम्नातं उभयं निवृत्तिप्रवृत्तिरूपं लक्षणं येषां तान्प्रव
त्तैव विशेषमाह दानेति ॥ २६ ॥ मोक्षधर्मान् शमदमादीन् ॥ भगवद्धर्मान् हरितोषणान् द्वादश्यादिनियमरूपान् ॥ समासव्या
सौ संक्षेपविस्तारौ तावेव योगौ उपायौ ताभ्याम् ॥ २७ ॥ धर्मादीश्च यथाधिकारं प्रति नियतोपायसहितान् ॥ यथा यथावत्
नानाख्यानेषु ये इतिहासाः तेषु यथासंभवितं वर्णयामास ॥ २८ ॥ छन्देनेच्छया मृत्युर्यस्य तस्य ॥ २९ ॥ सहस्रणीः शुद्धे समीप

सूत उवाच ॥ अथ युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे ॥ अपृच्छद्विविधान्धर्मानृषीणां चानुशृण्वताम् ॥ २५ ॥ पुरुषस्व
भावविहितान्यथावर्णं यथाश्रमम् ॥ वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥ २६ ॥ दानधर्मान्राजधर्मान्मो
क्षधर्मान्विभागशः ॥ स्त्रीधर्मान्भगवद्धर्मान्समासव्यासयोगतः ॥ २७ ॥ धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने ॥
नानाख्यानेतिहासेषु वर्णयामास तत्त्ववित् ॥ २८ ॥ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः ॥ यो योगिनश्छन्द
मृत्योर्वाञ्छितस्तूत्तरायणः ॥ २९ ॥ तदोपसंहृत्य गिरः सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे ॥ कृष्णे लसत्पीतप
टे चतुर्भुजे पुरःस्थितेऽमीलितदृग्व्यधारयत् ॥ ३० ॥ विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधश्रमः
निवृत्तसर्वेन्द्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजञ्जनार्दनम् ॥ ३१ ॥ भीष्म उवाच ॥ इति मतिरुपकल्पिता वितृष्णा भग
वति सात्वतपुंगवे विभूम्नि ॥ स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ३२ ॥ ॥ रामजी

स्यात्स्वहस्तेन वध्यते नो नयतीति पालयतीति ॥ सहस्रणीर्भीष्मः सहस्राणि वित्तानि यश्चे सहस्रार्थवतीर्गिरः ॥ लसंतौ शोभमा
नौ पीतौ पटौ अंबरीयस्य तस्मिन् ॥ अमीलितदृगेव मनो व्यधारयत् ॥ ३० ॥ अनयैव शुद्धया धारणया हतमशुभं यस्य सः
तस्य श्रीकृष्णस्येक्षया कृपयादृष्ट्यैव गत आयुधश्रमो यस्य सः ॥ अतएव निवृत्तः सर्वेन्द्रियवृत्तीनां विभ्रमो विविधो भ्रमो य
स्मात्सः जन्यं देहं ॥ परमफलरूपं श्रीकृष्णमेव रतिं प्रार्थयितं प्रथमं तु कुलकमर्पयति ॥ ३२ ॥ इति नानाधर्मोपायैर्मतिर्मनो
धारणा उपकल्पिता समर्पिता सात्वतानां पुंगवे श्रेष्ठे भगवति वितृष्णा निष्कामा अयं वितृष्णा निवाहेदः विगतो भूमाय

लक्ष्मण नीं अविरलेत्यर्थः

विजयोऽर्जुनस्तस्य रथ एव कुटुंबं प्रकृष्टं मैत्र्या पित्र्यं गोपायनं तस्मिन्नात्तं तोत्रं येन तस्मिन् ॥ धृता हस्तेन हयानां रश्मयः प्रग्रहाः येन तस्मिन् ॥ श्रीशब्दस्य विशेष्यम् ... तया शोभमानः ... तच्छ्रिया शोभया ईक्षणीये दर्शनीये भगवति मुमूर्षोर्मम रतिरस्तु ॥ ... यमिह निरीक्ष्य ... सर्वे ... स्वरूपं प्राप्ता इति दिव्यरूपाय प्रणामं कुर्वन्तमाह ॥ ... ललितेति ॥ ३९ ॥ ललितगतिविलासवल्गुहासादिभिः ... कल्पितः ॥ उरुमानः ...

विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये ॥ भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपं ॥ ३९ ॥ ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः ॥ कृतमनुकृतवत्य उन्मदान्धाः प्रकृतिमगन्किल यस्य गोपवध्वः ॥ ४० ॥ मुनिगणनृपवर्यसंकुलेऽन्तःसदसि युधिष्ठिरराजसूय एषां अर्हणमुपपेद ईक्षणीयो मम दृशिगोचर एष आविरात्मा ॥ ४१ ॥ ॥ रामाय नमः

जाया सा तामात्ततद्वत्कटेन मदेनान्धाः ॥ अत एव तदेकचित्तत्वेन तत्कृतं कर्म गोवर्धनोद्धरणादिकमनुकृतवत्यो गोपवध्वः यस्य प्रकृतिं स्वरूपमगमन्प्राप्तवत्यः ॥ मकारलोपस्त्वार्षः ॥ किलप्रसिद्धं तस्मिन्मे रतिरस्त्विति पूर्वेणान्वयः ॥ जगमुरिति वक्तव्ये ॥ ४० ॥ मुनिगणैर्नृपवर्यैश्च संकुले व्याप्तेऽन्तःसदसि सभामध्ये युधिष्ठिरस्य राजसूये ॥ एषां मुनिगणादीनामीक्षणीयः ॥ अहो रूपमहो महिमेत्येवमाश्चर्येण विलोकनीयः स एव उपपेदे प्राप पूजां गतात्मा मम दृष्टिगोचरः इति निश्चयः सन्प्राविष्कृतो वर्तते ॥ अहो मे भाग्यमिति भावः ॥ सोऽहं कृतार्थोऽस्मीत्याह तमिति ॥ ४१ ॥ राम

यत्र हिताहरेस्थितायाः एतेनात्मामुखं मे ग्रसितान्भीष्मादीन्निरीक्षे सर्वः ॥ स्वजनवधाद्धि सुखस्य निहत्स्यतत्त्वं गीतासु ॥ ए
वमुक्तोऽर्जुनः संख्ये रथोपस्थ उपाविशात् ॥ उक्तत्वमस्य शरं चापं शोकसंविग्नमानस इति क्रमति मन्दहते मादि जयाद्वितीये केवले
योगे नैव जयमावहन्त ॥ किं न विद्याहर्ता नान्ति ॥ मम त्वमहो तमनुग्रहकृतवानि त्याहं हास्यो ॥ २९ ॥ स्वनिगमम शास्त्रप
वाहे साहाय्य मा चेकरिष्यामीत्येवं भूतो स्वप्रतिज्ञां हित्वा श्रीकृष्णोमासंगृहयिष्यामीत्येवं रूपां मत्प्रतिज्ञां ऋतं सत्यं यथा
भवति तथा हि अथिको कार्ह योरथस्थः सन् ॥ अथ स्वतः सह सैवावतीर्ताः ध्वनुः सन्यो भ्यया तत्र मित्रमुखमयावत ॥ २

स्यः

या

यत्र हितरथतनामुखे निरीक्ष्य स्वजनवधाद्धि सुखस्य दोष बुद्ध्या ॥ क्रमति महद्दरदात्मविषयाँश्चरणारतिः परम
स्यतस्य मे स्तु ॥ ३९ ॥ स्वनिगमम पहाय मत्प्रतिज्ञामृतमधिकर्तुमवस्तुतो रथस्थः ॥ धृतरथ चरणो भ्ययाच्च
लद्गुर्हरिरिव हन्तुमिभं गतोत्तरीयः ॥ ३७ ॥ शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे
प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मुकुन्दः ॥ ३८ ॥

ग पथिगतं१

स्य

भं हन्तं हरिः सिंह इव कथंभूतो धृतं रथचरणं चक्रं येन सः ॥ तदा चुर्संबेधेणामात्तुष्य नाय विस्रते तदु सस्य सर्व स्थितभुव
नभारेणा प्रतिपदं चलन्ती गौः हस्ती यस्मात्तेनैव संभ्रमेण पतितमुत्तरीयं वस्त्रं यस्य स सम कुन्दो मे गतिर्भवत्विस्युत्तरे
णान्वयः ॥ ३० ॥ एवं यदा भ्यपाननदास्य यमानसान ताधिनोयन्विनो मे शितैस्तीक्ष्णैर्विशिखैर्बाणैर्हतस्ताडितो विशीर्णदं
सः विध्वस्तकवचः क्षतजेन रुधिरेण परिप्लुतः व्याप्तः प्रसभं बलात्कारेण तन्मर्जनमप्यतिक्रम्य मद्वधार्थमभिससारा
भिजगाम ॥ एवं योलोक प्रतीत्यार्जुनपक्षपाती चलति नः बलं तत्र समसे वानुग्रहं कृतवान् ॥ यत्र समभक्तो नो क्वचः
तत्माहृष्यास्त समेव भगवान्मे गतिर्भवति समर्थः तदेव मन्यायै वापि भृमवता यद्ग्रहेकु स्मरति मा शास्त ॥ ३९ ॥ ॥ ॥

केष यदा स्या हेतुमिति

श्री भा प्र टी ३१

दशमेकृतकार्यस्यहस्तिनापुरवर्तिनोहरेः ॥ स्त्रीभिःसंस्तूयमानस्यस्वपुरंप्रतिद्वारकागमः ॥ वासुदेवचकौरवेन्द्रंतत्रपृच्छतिहत्वेति
स्वस्यपितृरिक्थंस्पर्धन्तेइतिस्वरिक्थस्पृधः ॥ नस्यास्तवविक्रमस्यस्यात् संग्रामेपियातेः ॥ अतएववधवाहित्यवशगान्दातातायिनः ॥ तान्हत्वाप्रत्यव
रुद्धभोजनःवधुवद्यतःस्वेनसंकुचितभोगः ॥ राजस्थलासेनग्राममभोगावाकथंराज्येप्रवृत्तःप्रवृत्तोवाततःकिमकार्षीत ॥
राज्यप्रवृत्तोश्रीकृष्णस्यप्रीतिपर्यालोचनपूर्वकमुत्तरमाह ॥ ॥ वंशंकुरोःसंरोहयित्वाप्ररोहितिरुद्धगोणोनसरोरसा
ऊर्वितंकृत्वाकथंभूतंवंशोवंशादवाग्निनिर्हृतंवेणुएवदवोवनेतत्पात्तकृतःक्रोधयत्पौत्रिस्नेननिर्दग्धंतदस्यंनिजराज्येनिवेश्य

शौनक उ० ॥ हत्वास्वरिक्थस्पृधआततायिनोयुधिष्ठिरोधर्मभृतांवरिष्ठः ॥ सहानुजैःप्रत्यवरुद्धभोजनःकथंप्रवृत्तः
किमकार्षीत्ततः ॥ १ ॥ सूत उवाच ॥ वंशंकुरोर्वंशदवाग्निनिर्हृतंसंरोहयित्वाभवभावनोहरिः ॥ निवेशयित्वा
निजराज्यईश्वरोयुधिष्ठिरंप्रीतमनाबभूवह ॥ २ ॥ निशम्यभीष्मोक्तमथाच्युतोक्तंप्रवृत्तविज्ञानविधूतविभ्रमः
शशासगामिन्द्रइवाजिताश्रयःपरिध्युपान्तामनुजानुवर्तितः ॥ ३ ॥ कामंववर्षपर्जन्यःसर्वकामदुघाम
ही ॥ सिषिचुःस्मव्रजान्गावःपयसोधस्वतीर्मुदा ॥ ४ ॥ नद्यःसमुद्रागिरयःसवनस्पतिवीरुधः ॥ फलन्त्यो
षधयःसर्वाःकाममन्वृतुतस्यवै ॥ ५ ॥ नाधयोव्याधयःक्लेशादैवभूतात्महेतवः ॥ अजातशत्रावभवन्जन्तूनां
राज्ञिकर्हिचित् ॥ ६ ॥

राज्यप्रवृत्तोहृतमुक्त्वाकिमकार्षीदित्यस्योत्तरमाहनिशम्येति ॥ ३ ॥ प्रवृत्तंयद्विज्ञानंपरमेश्वरविषयंतेनविधूतोविभ्रमो
येनसः ॥ अहंकर्तेत्यादिरूपोमोहोयस्यसः अनुजैरनुवर्तितः सेवितःसन् अजितःश्रीकृष्ण
एवाश्रयोयस्यसः परिधिःसमुद्रःतत्पर्यन्तांगांपृथ्वीपालयामासतस्यराज्ञामनुर्लीयतिकाममितित्रिभिः ॥ ३ ॥ मही
सर्वकामदोग्ध्रीबभूवव्रजान्गोष्ठानिऊधस्वतीः ऊधःस्तनाशयःस्थूलोयासांताः सिषिचुःअभ्यषिं
चन् ॥ ४ ॥ अन्वृतु ॥ ५ ॥ आधयोमनोपीडाव्याधयोरोगाःक्लेशाःशीतोष्णादिनाःदैवंभूतान्यात्माचहेतवोये
षांआधिदैविकादीनांजन्तूनांनाभवन् ॥ इदानींद्वारकागमनंनिरूपयितुमाह उषित्वेति ॥ ६ ॥ ॥

यप्रवेश्य

मन्वृतुतस्यवै

३१

तावतीरं

तमिममहमजंसमूप्राधिगतोस्मि ॥ समाधिगतोस्मि ॥ विधूतभेदमोहः ॥ तदर्थीभेदस्योपाधिकत्वमाह आत्मकल्पितानां स्व
यं निर्मितानां शरीरभाजां प्राणिनां हृदि हृदि धिष्ठितं अधिष्ठितं मकारलोपश्छान्दसः नैकधा अनेकधा धि
ष्ठानभेदात् ॥ अनेकधा भातमित्यर्थः ॥ अत्र दृष्टान्तः सर्वप्राणिनां प्रतिदृशं दृशं दृशं प्रति एकमेवार्कमनेकधा प्रतीतमिवेति ५२
मनोवाग्दृष्टीनां वृत्तिभिः परमात्मनि श्रीकृष्णे अन्तरेव लीनः श्वासोपरमः ॥ ४३ ॥ निष्कले निरुपाधौ संपद्यमानं मि
मम
तमिमहमजं शरीरभाजां हृदि हृदि धिष्ठितमात्मकल्पितानां ॥ प्रतिदृशमिव नैकधार्कमेकं समधिग
तोस्मि विधूतभेदमोहः ॥ ४२ ॥ सूत उवाच ॥ कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः ॥ आत्मन्यात्मानमावे
श्य सोन्तःश्वास उपारमत् ॥ ४३ ॥ संपद्यमानमाज्ञाय भीष्मं ब्रह्मणि निष्कले ॥ सर्वे बभूवुस्ते तूष्णीं वयांसी
व दिनात्यये ॥ ४४ ॥ तत्र दुंदुभयो नेदुर्देवमानववादिताः ॥ शशंसुः साधवो राज्ञां खात्पेतुः पुष्पवृष्टयः ॥ ४५
तस्य निर्हरणादीनि संपरेतस्य भार्गव ॥ युधिष्ठिरः कारयित्वा मुहूर्तं दुःखितोभवत् ॥ ४६ ॥ तुष्टुवुर्मुनि
यो हृष्टाः कृष्णं तद्गुह्यनामभिः ॥ ततस्ते कृष्णहृदयाः स्वाश्रमान्प्रययुः पुनः ॥ ४७ ॥ ततो युधिष्ठिरो गत्वा
सहकृष्णो गजाह्वयं ॥ पितरं सांत्वयामास गांधारीं च तपस्विनीम् ॥ ४८ ॥ पित्रा चानुमतो राजा वासुदेवानु
मोदितः ॥ चकार राज्यं धर्मेण पितृपैतामहं प्रभुः ॥ ४९ ॥ इति श्रीभागवते प्रथमस्कंधे युधिष्ठिरराज्यप्र
लंभो नाम नवमोध्यायः ९ ॥

लितमात्मनो ज्ञात्वा लक्ष्य ॥ ४४ ॥ देवैर्मानवैश्च वादिताः राज्ञां मध्ये ये साधवो न सह पूर्वः ॥ ४५ ॥ निर्हरणादीनि संस्का
रादीनि सम्यक्कारयित्वा मुहूर्तं सापी न्यर्थः ॥ ४६ ॥ कृष्णे हृदयं येषां वा कृष्णस्य हृदये ये प्रीति गच्छन्ति ॥ कृष्णस्य हृद
यं येषां रहस्यनामभिः श्रेयस्कराणि वा तादृशैः ॥ ४७ ॥ पितरं धृतराष्ट्रं तपस्विनीं संतापवतीं ॥ ४८ ॥ राजा युधिष्ठिरः
४९ ॥ ५० ॥ इति श्रीभावार्थदीपिकायां प्रथमस्कंधे नवमोध्यायः ॥ ९ ॥

श्री० भाग० टी० ३२

प्रेमव्रीडास्मितसूर्वीक्षणायासंतताः ॥१८॥ गुडाकानिद्रातस्याईशोजितमनिद्रोऽर्जुनः ॥१०॥ यत्र ज्ञनेवामवेजगुरूत्तमर्मधुपतिः श्रीकृ
ष्णः ॥१८॥ सखायः श्रीकृष्णे तासामप्यणिकाघात ॥ किंत नानुरूपाः श्रुता ॥ अनुरूपा स्व निर्गुणास्यपरमानंदस्य ॥ सर्वा भवेत्सा
दर्शनात् रूपाः गुणात्मनो मनुष्यनाट्यावतारेनुरूपा स्वसमर्थः तथैव वार्त्ता ॥१९॥ सर्वाः स्त्रुतीनां मनोहराश्च येविषदामृ
तिमतयः ते सेजलसमभ्यनेद ज्ञिमर्थः ॥ तत्र तेजः सौंदर्य्यघृतिशायेनविस्मिताभ्रूसा ल्लीभिर्व्याप्ताः स्त्रियः कथयंति नात्रविस्म
यः कार्यः सातादीश्वरत्वादस्मिनित देवाहं चतसृभिः ॥२०॥ वेत्र सारां ता निलेति प्रसिद्धाप्रसमायायोनको ॥ यएक एवाद्विती।

प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया ॥ ववर्षुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः ॥१८॥ सितातपत्रं जग्राह मुक्ता
दामविभूषितं ॥ रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह ॥१९॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते विकीर्यमानः
कुसुमैः रेजे मधुपतिः पथि ॥१८॥ अश्रूयंताशिषः सत्याः तत्र तत्र द्विजेरिताः ॥ नानुरूपानुरूपाश्च निर्गुणस्य गु
णात्मनः ॥१९॥ अन्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां ॥ कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः ॥२१॥ स
वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ॥ अग्रे गुणेभ्यो जगदात्मनीश्वरे नि
मीलितात्मन्निशि सुप्तशक्तिषु ॥२१॥ ॥ ॐ श्रीरामकृष्णाय नमो नमः ॥

यः ॥ पुरुषआसीत्सएवायं श्रीकृष्णः ॥ कुत्रासीदविशेषे आत्मनि निष्प्रपंचे निजरूपे कदा अग्रेगुणेभ्योगुणानां लोभात्सर्वे
तथा निशि प्रलयैक स्वांतस्य लंतणांजगतामात्मनि जीवे निमीलितात्मनि तैः मीलितात्मन्निति लुप्तसप्तम्यंतपदे ॥
जातवेकचवंनरंई स्वेलीनरूपषुजीवेषुसत्स्वित्यर्थः ॥ ननुजीवानांब्रह्मत्वात्कथं लयः ॥ तत्रा
ह सुप्ताः स्वशक्तिषु सतीषु जीवोपाधिभूतसत्वादिशक्तिलयएवजीवलय इत्यर्थः
तदेवं सर्वेश्वरादौ प्रलयोत्तरे च निष्प्रपंचावस्थानमुक्तास्त्विप्रल
ययोर्मध्ये सप्रपंचावस्थानमाह ॥२२॥ राम

च ते

नवेषु

स्वसुः सुभद्रायाः ॥ ९ ॥ तं युधिष्ठिरं ॥ ७ ॥ युयुत्सुः धृतराष्ट्राद्वैश्यायां जातो यो तमः कृपाचार्यो नकुल सहदेवौ ॥ ९ ॥ अमात्यस्त्रियो
मत्स्यसुतोत्तरा तस्याः पुनर्गृहराणां वत्सकश्रीकृष्ण विरहे मोहाधिक्यात् ॥ यदा मत्स्यसुता समवर्तीते षां कृष्ण विरहासहृ
नेकैः सुसमायेन हस्तसंगादि निद्रायां ॥ ९ ॥ सतां सेवा ... तोत्र ... प्रजादि विषयोऽः संगो येन सः सद्भिः कीर्त्यमाने
तविका वेयस्य यशः सकृदपानक एव तत्र वा न ... शृणोति ॥ ११ ॥ दर्शनादि ... तस्मिन् श्रीकृष्णे यत्ता ... यो येषां

उषित्वा हस्तिनपुरे मासान्कतिपयान् हरिः ॥ सहृदयं च वियोगकातरं स्वस्य प्रियकाम्यया ॥ ७ ॥ आमंत्र्य चाभ्यनु
ज्ञातः परिष्वज्याभिवाद्य तं ॥ आरुरोह रथं कैश्चित् परिष्वक्तोभिवादितः ॥ ८ ॥ सुभद्रा द्रौपदी कुंती विराट
तनया तथा ॥ गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥ ९ ॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः
न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः ॥ १० ॥ सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः ॥ कीर्त्यमानं यशो
यस्य सकृदाकर्ण्य रोचनं ॥ ११ ॥ तस्मिन्न्यस्तधियः पार्थाः सहेरन्विरहं कथं ॥ दर्शनस्पर्शसंलापशय
नासनभोजनैः ॥ १२ ॥ सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः ॥ वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह ॥ १३ ॥
न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते ॥ निर्यात्यगारान्नोऽभद्रमिति स्याद्बांधवस्त्रियः ॥ १४ ॥ मृदंगशं
खभेर्यश्च वीणापणवगोमुखाः ॥ धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तदा ॥ १५ ॥ ॥ ॐ नमो भगवते नमः

ते ॥ १२ ॥ अत एवानिमिषैर्नेत्रैस्तमेव वीक्ष्यमाणास्तत्र तत्र इतस्ततो ... विचेलुरिति ... स्नेहेन सम्यक्बद्धाः ॥
अत एव तमनुगताः ... ॥ १३ ॥ अगारान्निर्गच्छति सति ॥ ... उद्गलद्बाष्पम् ...
... कथनम् ॥ ने ... नमः ॥ ... ॥ १४ ॥ मृदंगादयो दश

यीतिनि

श्री० यद्यस्मादेषपुरुषोत्तमः श्रियः पतिः स्वजन्मना यदोः कुलं श्लाघितं जयति सत्करोति अतः श्लाघ्यतमं तत्र चंक्रमणेन म
भाग्र० धोर्वनं मथुरां सत्करोति॥ अतः तत्पुण्यतमम् इति तदेव मधुर्वनस्यापि श्रेयस्तताति यद्येवालमिति॥ तत्रापि आश्चर्यं स्वर्गे अहो इत्यवत्का
टी० म॥२५॥ अहो बतेत्याश्चर्ये॥ किं तत्कुशस्थली द्वारका स्वर्गं इतराणि तिरस्करोति यद्यशस्तस्य तिरस्करी पुण्यं तद्विभवकर्त्री भवस्तत्पु
३३ ण्ययशस्करी च भवतीति यत्॥ यतो यत्प्रजाः स्वानुग्रहेणेषितं प्रेषितं स्मितसहितं च अवलोकं यद्वानुग्रहार्थमिषितं॥
मिष्टं स्वस्यात्मनः पतिं तं श्रीकृष्णं नित्यं पिबन्ति आदिवहे हमान पतिं निरंतरं पश्यंति स्म अहो आश्चर्यमित्यर्थः॥ अधितमिति पातेस्त्वा॥

अहो अलं श्लाघ्यतमं यदोः कुलं अहो अलं पुण्यतमं मधोर्वनं॥ यदेष पुंसामृषभः श्रियः पतिः स्वजन्मना
चंक्रमणेन चांचति॥२६॥ अहो बत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः॥ पश्यंति नित्यं
यदनुग्रहेषितं स्मितावलोकं स्वपतिं स्म यत्प्रजाः॥२७॥ नूनं व्रतस्नानहुतादिनेश्वरः समर्चितो ह्यस्य गृही
तपाणिभिः॥ पिबंति याः सख्यधरामृतं मुहुर्व्रजस्त्रियः संमुमुहुर्यदाशयाः॥२८॥ या वी
र्यशुल्केन हृता स्वयंवरे प्रमथ्य चैद्यप्रमुखान्हि शुष्मिणः॥ प्रद्युम्नसांबांब
सुतादयोपरा याश्चाहृता भौमवधे सहस्रशः॥२९॥ रामजी

नुग्रहार्थमुषितं कृतं निवासेनैतत्स्वर्गोस्तीत्यर्थः॥२७॥ हे सखि अस्य गृहीतपाणिभिः पत्नीभिरीश्वरोयमेव नू।
नं जन्मांतरेषु समर्चितः॥ यस्मिन्नधरामृते आशयश्चित्तं यासां ताः संमोहं प्रापुः इति मनो... हरत्वमुक्तं एतस्य
तेजस्त्वात्... समर्चितः॥ वीर्यप्रभावप्रशुल्कं मूल्यं तेन शुष्मिणो बलिष्ठान्॥ प्रद्युम्नश्च सांबश्चांबश्च
पंचः याश्चेतिद्वाभ्यां॥२८॥
वश्च सुता यासां रुक्मिणीजांबवतीनाग्नजितीप्रभृतीनां आदिर्यासां सत्यभा
मादीनां ताः याश्चापराः॥ अस्य श्लोकस्योत्तरश्लो
केनान्वयः॥२९॥ राम

सएवाप्रच्युतैश्वर्यैरेव प्रकृतिमनुसंसाराधिष्ठितवान् ॥ भूयः पुनः सृष्टिं प्रवाहरूपानादित्वात् ॥ कीदृशीं निजवीर्यचोदितां
स्वकालशक्तिप्रेरितां स्वांशभूतानां जीवानां मायामोहितानां अतएवविसृजतां सहसूक्ष्मिकृतां ॥ किमर्थमनुसंसारबन्धनामरूपे
आत्मनिजीवरूपनामनी विधातेति कुरुत् ॥ उपाधिस्तस्याजीवानां भोगायेमर्थः ॥ कर्माणि च विधातं वेदान्कृत्वा निमा
ऽकः ॥ प्राप्तकर्तृत्वेति अस्य दर्शनं न स्यादिति दुर्लभमस्मात्विलिनमित्याह ॥ २२ ॥ सर्वेषां ये यं सम्प्रदेस्वरूपमपि वा निर्जितो मा
तरिश्वा प्राणायेते स्वस्वमार्गे तिस्रवयएवरूपयन्ति केन ॥ भक्त्यानन्यतालिन अत्यन्तविनीतमनस्का आत्मानं बुद्धिसेन रूपएते तु
ग्रा यावबुध्येति स्यन्ते ॥ बुद्धिर्वै मनस्तस्यापश्यमेव देहेतविनाह ॥ नत्रैदेहेतविशेषएवएकसर्वबुद्धिंपरिमाष्टुं समस्तकृशोयवित

सएवभूयोनिजवीर्यचोदितांस्वजीवस्मायांप्रकृतिंविसृजतौ ॥ स्वनामरूपात्मानिरूपनामनीविधित्समानोत्र
मसारंपोसकृत ॥ २२ ॥ सर्वाश्रयं यस्मद मत्र सर्वयो जितेन्द्रियानिर्जितमातरिश्वन ॥ पश्यन्तिभक्त्युत्कलितामम
लात्मनानन्तेषसत्वपरिमाष्टुमर्हति ॥ २३ ॥ सर्वाश्रयंसत्यउगीतसत्कथावेदगुह्येषु च वेदवादिभिः ॥
यएककईशोजगदात्मलीलयासृजत्यवत्यत्ति न तत्र सज्जते ॥ २४ ॥ यदात्मयमेणतमोधियोन्धपाजीवंतित
वैषहिसन्ततः किल ॥ यतेभयंसत्तमनन्तदयायपाश्रवायरूपाणिदधत्परेगुरो ॥ २५ ॥ ॥ रामानुजी ॥

मुहीति न तयोगादय इति स्वार्थः ॥ यद्वात्र अहो एष एवसत्वं सत्वानं परिमाष्टुंनाधायितं हरवामनेनाप्रपत्तीभवितेना
र्हति ॥ किंतत्रैनैवसहंतवामित्यर्थः ॥ पुण्यश्लोकतामाहु ॥ २३ ॥ हे सर्वेयावेदेषुरहस्यागमेषु च वेरहस्यनिरूप
कैरनुगीतसत्कथाः ॥ अनुगीताः सन्तः कथायस्य स एवाययानप्रकारमाहु ॥ यएककईशइत्यादि एवंभूतस्य नाना
वतारकारणमाह ॥ यदेति ॥ २४ ॥ तमोन्धामायीर्यथातेनन्धा यमेणाजीवंति ॥ केवलं प्राणान्धुसमतितत्र तदा एव
एवभूवायस्मिन्सन्ततः विशुद्धरूपाणिसत्त्वेनरूपाणिदधत् ॥ भगवादीनियुनप्रकटयतिगुणगोगतनन्दवसरेभंग
मेस्वर्थसत्वसत्यप्रतिनतनस्त्रलोयथार्थोपदेशाकस्यदयामकेवापाययसादुलकर्मत्वविशेषतः ॥ श्रीकृष्णावतारेसो
भाग्यंवर्णयति ॥ अहो इतिपंचभिः ॥ २५ ॥

दाध्मायमानः अतिशयेन भगवता आपूर्यमाणः ३ श्रुत्वेभे ३

इत्यन्वयः कथंभूतः ३ धवलोदरः उरुक्रमः श्रीकृष्णस्याधरशोणेन शोणिमा भावो यस्य स अधरशोणशोणिमा स्वार्थे इमन् करकंजे करकमले ते योः संपुटे मध्ये वर्तमानः ३

श्री॰ भाग॰ टी॰ ५४

आनर्तैः स्तूयमानस्य पुरीं निर्विविक्षवे पुत्रिः ॥ एकादशे वर्णितः सभ्याग्यादेवेन्द्रस्यापि सुविते ॥ उक्तैः कृत्सनलसौरमदं च प्रजानां तो
रणाम् ॥ उत्सवमुत्सवदीपालिस्वपुरं प्रविवेश विशान् ॥ स्वच्छान्स्वसमृद्धान्स्वदेशान् तत्र जनपदान् शयं खेदं आवादितवान् ॥१॥ दर
वरः पांचजन्यः उच्चकाशे शुशुभे धवलमुदरं यस्य सोऽसौ ॥ कथं भूतः काशे अम्बुजखंडे कमलसमूहे कलहंसो राजहंसो यथा
याचकाक्लिनदत ॥२॥ जगतो यद्भयं तस्य भयावहं प्रत्युद्ययुः ॥ प्रत्युद्गम्य भर्तुर्दर्शनेन लालसा औत्सुक्यं यासां ताः उत्स्वनः उच्चशब्दो ३ ३

मूलः॥

आनर्तान्स उपव्रज्य स्वृद्धान्जनपदान्स्वकान् ॥ दध्मौ दरवरं तेषां विषादं शमयन्निव ॥१॥ स उच्चकाशे धवलो
दरो दरोप्युरुक्रमस्याधरशोणशोणिमा ॥ दाध्मायमानः करकंजसंपुटे यथाब्जखंडे कलहंस उत्स्वनः ॥२॥
तमुपश्रुत्य निनदं जगद्भयभयावहम् ॥ प्रत्युद्ययुः प्रजाः सर्वाः भर्तृदर्शनलालसाः ॥३॥ तत्रोपनीतबल
यो रवेर्दीपमिवादृताः ॥ आत्मारामं पूर्णकामं निजलाभेन नित्यदा ॥४॥ प्रीत्युत्फुल्लमुखाः प्रोचुर्हर्षगद्ग
दया गिरा ॥ पितरं सर्वसुहृदमवितारमिवार्भकाः ॥५॥ नताः स्मते नाथ सदांघ्रिपंकजं विरिंचिवैरिंच्यसुरें
द्रवंदितम् ॥ परायणं क्षेममिहेच्छतां परं न यत्र कालः प्रभवेत्परः प्रभुः ॥६॥ ॥ श्रीतस्मैरामायनमः॥

तं

तत्र तस्मिन् श्रीकृष्णे उपनीताः समर्पिता बलयः उपायनानि याभिः निरपेक्षे पितस्मिन्नादरेण समर्पणे दृष्टान्तः रवे
र्दीपमिवेति ॥४॥ पितरमर्भका इव सर्वसुहृदमवितारमूचुरिति उत्तरेणान्वयः ॥ सुहृत्त्वेनैवावितारं न तु कामेन
प्रत्रहेतुः ॥ आत्मारामं तत्रापि हेतुः परमानंदनिजस्वरूपलाभेनैव पूर्णकामं किमूचुरित्याह ॥५॥ तं नताः स्मेति विरिं
चिर्ब्रह्मा वैरिंच्याः सनकादयः इह संसारे परं क्षेममिच्छतां परायणं ॥ कुतः परेषां ब्रह्मादीनां प्रभुरपि कालो यत्र प्रभु
र्न भवेत ॥६॥ ॥ राम ॥परमं शरणं॥ परः न प्रभवेत

३५

एताः स्त्रीत्वमेव परं केवलं साधु शोभनं कुर्वते अपास्तं पेशलं भद्रं स्वातंत्र्यं यस्मात् ॥ निरस्तशौचं शुचित्वं यस्मात् ॥ तथाभूतमपि
जातु कदाचिदपि नापैति न निर्गच्छति ॥ आहृतिभिर्बर्हवहारैर्युद्धापारिजातादिभिर्वा स्त्रीणां हृदयहरणैः हृदि स्पृशन् आनंदयन् ॥३०॥
पूर्वं वियास्त्रिन्नाविरः सस्मितेन निरीक्षणेनाभिनंदन् संहृदविपर्ययौ ॥३१॥ मधुद्विषो गोपीथाय रक्षणाय स्नेहात्परेभ्यः शत्रुभ्यः
शंकितः सन्प्रायुंक्त ॥ हस्त्यश्वरथपादातं चतुरंगिणी हतनासेनां ॥३४॥ पीडं कुरुजांगलजनान् पीडयत्वा अपि कौरवान्
वनान्प्रियैः सुहृद्बांधवादिभिः सह ॥३५॥ कुरुक्षेत्रे कुरुदेशान् वनानि एवमतिक्रम्यान विवक्षितः मरुत्वनिरुदकदेशोधन्वो लोप

एताः परं स्त्रीत्वमपास्तपेशलं निरस्तशौचं बत साधु कुर्वते ॥ यासां गृहात्पुष्करलोचनः पतिर्न जात्वपैत्याहृतिभिर्हृदि
स्पृशन् ॥३०॥ एवंविधा वदंतीनां स गिरः पुरयोषिताम् ॥ निरीक्षणेनाभिनंदन् सस्मितेन ययौ हरिः ॥ ३१
अजातशत्रुः पृतनां गोपीथाय मधुद्विषः ॥ परेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीम् ॥३२॥ अथ दूरागता
न् शौरिः कौरवान्विरहातुरान् ॥ सन्निवर्त्य दृढं स्निग्धान् प्रायात्स्वनगरीं प्रियैः ॥३३॥ कुरुजांगलपांचाला
न् शूरसेनान्सयामुनान् ॥ ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतान् [illegible] नथ ॥३४॥ मरुधन्वमतिक्रम्य सौ
२ वीराभीरयोः परान् ॥ आनर्तान्भार्गवोपागाच्छ्रांतवाहो मनाग्विभुः ॥३५॥ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्ह
णः सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥३६॥ इति श्रीभावार्थदीपिकायां भागवते प्रथमस्कंधे दशमः

पदकः ॥ आनर्तान्द्वारकादेशान् सविधं उपागात्प्राप्त ॥ हे भार्गव मनाक् ईषत् श्रांतवाहाः यस्य सः तत्र तत्र तस्मिं
देशे तत्रत्यैर्जनैः प्रत्युद्यतानि निवेदितानि अर्हणानि ॥ उपायनानि यस्य सः सायं सपर्याः पश्चाद्दिशं पश्चिमां दिशं भे
जे प्राप्तः ॥ तदा गविष्ठः स्वर्गस्थः सूर्यो गां समुद्रं गतः प्रविष्टः अस्तं गत इत्यर्थः ॥ अथो वा एष प्रातरुदेति अप स्सायं
प्रविशतीति श्रुतेः यद्वा तदा सायंकाले जातेन या द्ववती यत्र विष्टोभ्य सौ स्थितः ॥ गोकुलाभ्यायं गतः सन् पश्चाद्दिशं
संप्राप्य भेजे ॥ उपाश्रितवानित्यर्थः ॥३६॥ इति प्रथमे दशमः ॥१०॥ ॥

३।३।२ न३ वारांगं द्वरं नरानवस्त्मानिनयचनुरः४ कीदृशे

श्री प्रेष्ठमार्यं तं निशम्य कृत्वा वसुदेवादयः अक्रूरजस्तु रितिचनर्थे चान्वयः ॥ १९ ॥ उल्लसितानि प्रहर्षविगोत्रोक्तसितानि प्रायुना ।
भाग्य दीनिये स्वस्वस्तितिवाना ॥ ७ ॥ मंगलार्थं रागस्तुरवनैः कृत्वा ससमंगलैः समंगलपुष्पादिस्तु क्तयाविभिः दिने वस्त्रोषाम
टी॰ त्रपात्रप्रणयेन स्वे स्वे प्रागतः सायसः संभ्रमः येषां ॥ ८ ॥ बाहुस्तु रत्नानन्दादयश्च प्रस्तुतस्तु लसत्कुंडलैर्निर्भातानि यानि
३५ कपोलानि तैर्वदनश्रीः शोभा यासां ताः वारस्त्रुख्यानर्तक्योऽपि यत्र ॥ ९ ॥ सूताः पौराणिकाः आक्रामागाया वंशश

स्त्रावि द्वाविशुद्धानां च दध्यनन्तफलैस्तु भिः ॥ अलंकृतां पूर्णकुंभैर्बलिभिर्दीपधूपकैः ॥ ११ ॥ निशम्य प्रेष्ठमा ।
यान्तं वसुदेवा महामनाः ॥ अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः ॥ १२ ॥ प्रद्युम्नश्चारुदेष्णश्च सांबो जांबव
तीसुतः ॥ प्रहर्षवेगोच्छ्वसितशयनासनभोजनाः ॥ १३ ॥ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः ॥ शंखतू
र्यनिनादेन ब्रह्मघोषेण चादृताः ॥ प्रत्युज्जग्मुः रथैर्हृष्टाः प्रणयागतसाध्वसाः ॥ १४ ॥ वारमुख्याश्च शतशो यानैः
यानैः५ स्तद्दर्शनोत्सुकाः ॥ लसत्कुंडलनिर्भातकपोलवदनश्रियः ॥ १५ ॥ नटनर्तकगंधर्वाः सूतमागधवंदिनः
गायंति चोत्तमश्लोकचरितान्यद्भुतानि च ॥ २० ॥ भगवांस्तत्र बंधूनां पौराणामनुवर्तिनां ॥ यथाविध्युपसंग
म्य सर्वेषां मानमादधे ॥ २१ ॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः ॥ आश्वास्य चाश्वपाकेभ्यो वरैश्चाभि
मतैर्विभुः ॥ २२ ॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि ॥ आशीर्भिर्युज्यमानोऽन्यैर्वंदिभिश्चाविशत्पुरं २२
राजमार्गं गते कृष्णे द्वारकायाः कुलस्त्रियः ॥ हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥ २४ ॥ ॥ राम ॥

सकाः [illegible] वंदिनस्तु सम्लप्रज्ञाः प्रस्तावसदृशोक्तयः ॥ नवरसाभिनयचतुरा नटा तालायतु सावे
णान्तः संतो नर्तकाः गायका वा ॥ गायकाः ते सर्वे गायंति चेति च कारस्यान्वयः ॥ अद्भुतानि चेति द्वितीयचकारस्य वंदिनश्चेत्य
न्वयः ॥ २० ॥ यथाविधि ये सहृदयो यथोचितं तैः तथा समागमं कृत्वा निःसंध्यैः तदा हृष्यकेति ॥ २१ ॥ प्रह्वत्वं शिरसा नतिः
अभिवादनं वाचा नतिः ॥ आश्वास्य आभयं दत्वा श्वपाकानभिव्याप्य वरैः अभीष्टदानेन च मानं कृतवान् ॥ शिरो नतिवाङ्
स्यादिभिः ॥ २२ ॥ अन्यैश्च वंदिभिश्च ॥ २३ ॥ तस्य तदीक्षणमहोत्सवो येषां ताः ॥ २४ ॥

राम ३५

हास्यहस्तगृहादिभिः सर्वे सामानं कृतवान् व

अतः भवाय उद्भवाय नः अस्माकं त्वं भव हे विश्वभावन कृतिनः कृतार्था बभूविम जीवयं ॥ कृतार्थत्वमेवाह ॥ अहो इति ॥ ७ ॥ अहो भवता वयं सनाथाः स्म यत् यस्मात् त्वं हृषीकेश पथोपमं त्रैविष्टपानामपि दूरदर्शनं यस्य देवानामपि दुर्लभमित्यर्थः प्रेमस्मितेन तथा कंस्निग्धं निरीक्षणं यस्मिंस्तत् तादृशं यस्मिंस्तद्रूपं सर्वेषु सौभगं यस्मिंस्तत् ॥ अर्भका इव सकरुणा आहुः ॥ ८ ॥ यर्हि यदा अम्भोजाक्ष कुरून् मधून् वा सुहृद्दिदृक्षया ... ॥ तत्र तदा ... कोटिप्रतिमः ... ॥ एवं तव न स्यात् ... अपीत्यर्थः ॥ ९ ॥

भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत्पतिः पिता ॥ त्वं सद्गुरुर्नः परमं च दैवतं यस्यानुवृत्त्या कृतिनो बभूविम ॥ ६ ॥ अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनम् ॥ प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगम् ॥ ७ ॥ यर्ह्यम्बुजाक्षापससार भो भवान्कुरून्मधून्वाथ सुहृद्दिदृक्षया ॥ तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्तवाच्युत ॥ ८ ॥ इति चोदीरिता वाचः प्रजानां भक्तवत्सलः ॥ शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरम् ॥ ९ ॥ मधुभोजदशार्हार्हकुकुरान्धकवृष्णिभिः ॥ आत्मतुल्यबलैर्गुप्तां नागैर्भोगवतीमिव ॥ १० ॥ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः ॥ उद्यानोपवनारामैर्वृतपद्माकरश्रियम् ॥ ११ ॥ गोपुरद्वारमार्गेषु कृतकौतुकतोरणाम् ॥ चित्रध्वजपताकाग्रैरन्तः प्रतिहतातपाम् ॥ १२ ॥ सम्मार्जितमहामार्गरथ्यापणकचत्वराम् ॥ सिक्तां गन्धजलैरुप्तां फलपुष्पाक्षताङ्कुरैः ॥ १३ ॥ ॥

एवं विधा अपि प्रजोदीरिता वाचः शृण्वन् दृष्ट्या सानन्दावलोकनेन अनुग्रहं कुर्वन् द्वारकां अविशत् इति पञ्चभिः ॥ ९ ॥ तां पुरीं वर्णयति पञ्चभिः मध्विति स्वतुल्यबलैर्मधुभोजादिभिर्गुप्तां रक्षिताम् ॥ १० ॥ सर्वेषु ऋतुषु सर्वे विभवाः पुष्पादिसम्पदो येषां तेषु पुण्यवृक्षाः लताश्रमाः लतामण्डपास्तैर्युक्तैः उद्यानादिभिर्वृताम् ॥ पद्माकराः सरांसि तैः श्रीः शोभा यस्यास्ताम् ॥ उद्यानं फलप्रधानं उपवनं पुष्पप्रधानं ॥ आरामः क्रीडार्थं वनं ॥ ११ ॥ गोपुरं पुरद्वारं द्वाराणि गृहद्वाराणि मार्गाः ... कृतानि कौतुकार्थं तोरणानि यस्यां ताम् ॥ ध्वजाः पताकाः तासामग्रैरन्तः प्रतिहत आतपः यस्यां ताम् ॥ १२ ॥

न केवलं भवद्दर्शनेन अस्माकं ... किंतु जीवनमपि दुर्लभमित्याहुः प्रपन्नानां तत्क्षणरूपो यो विलक्षणः प्राप्तस्तस्य शोधनं नाशकं त्वं प्रपन्नानां तत्क्षणसंभवात् इति ५ किंशा

पे२ पुरीं५ प्राविशत् तां द्वारिकां५

तेषु२

तस्माद्दुष्यात्मनो नस्पुर

श्रवनतं

आसनाद्देन३

श्री भाग टी ३५

प्रोष्य देशांतरं उषित्वा आगत्य दूरादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः॥ आसनाद्देहं न आशया देतः करणात् तैः व्र-
तैः आशयो तः करणं श्रीकृष्णे नात्मनः संश्लेषे यत्नः तत्र साकं व्रतैः आसनमपि नासहत् इत्यर्थः॥ व्रीडितानि लोचनान्याननानि च
यासां ताः व्रीडितलोचनाननाः। व्रीडितलोचनाननाः सर्वा अपि उत्तस्थुरित्यर्थः॥ साकं व्रतैरिति हास्यक्रीडावर्जनादि नियमा-
दिभ्यो प्युत्तस्थुरित्यर्थः॥ भुज व्रतानि निवाप्य तानि यानि वल्लभो कानि क्रीडाद्याः समस्का वेसमाजो त्सवदर्शनु-
म॥ हास्ये पर गृहे यान त्यजे प्रोषित भर्तृके ति॥ ३२॥ आत्मज ते पतिं दर्शनालिंगनात्मनात्तु आपरिरेभिरे तत्र तो दृष्टिभिर्विदि-
ये: ततः समीपमागतमात्मजेः पुत्रैर्गृहीत कन्यालिंगितमिव स्वदेहं आलिंगितवत्य इत्यर्थः॥ ततोऽहं तः दुरंत

पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनो महोत्सवाः॥ उत्तस्थुरारात्सहसासनाशयात्साकं व्रतैर्व्रीडि
तलोचनाननाः॥ ३२॥ तमात्मजैर्दृष्टिभिरंतरात्मना दुरंतभावाः परिरेभिरे पतिं॥ निरुद्धमप्यास्रवदंबु नेत्रयो-
र्विलज्जतीनां भृगुवर्य वैक्लवात्॥ ३३॥ यद्यप्यसौ पार्श्वगतो रहोगतस्तथापि तस्यांघ्रियुगं नवं नवं॥ पदे पदे
का विरमेत तत्पदाच्चलापि यच्छ्रीर्न जहाति कर्हिचित्॥ ३४॥ एवं नृपाणां क्षितिभारजन्मनामक्षौहिणीभिः
परिवृत्ततेजसां॥ विधाय वैरं श्वसनो यथानलं मिथो वधेनोपरतो निरायुधः॥ ३५॥ स एष नरलोकेस्मिन्नव
तीर्णः स्वमायया॥ रेमे स्त्रीरत्नकूटस्थो भगवान्प्राकृतो यथा॥ ३६॥ ॥

तभावाः गंभीराभिप्रायाः॥ तदा च तासां चनेत्रयोर्निरुद्धमपि अस्रवदंबु बाष्पं वैक्लव्यादेव स्यादा स्रवदीषत्स्रवत्॥ अ
त एव वैवर्ण्यहानार्थं विलज्जतीनां हे भृगुवर्य चित्रं स्फुटं इति॥ ३३॥ पार्श्वगतः समीपस्थः तत्रापि रहोगतः एकांते प्रवर्त
ते तस्य पदे पदे प्रति क्षणं नवं नवमेवाग्रे कैमुत्यमाह। का विरमेत इति चलाचलस्वभावापि श्रीर्न जहाति इत्युक्तो श्रीकृष्ण
चरिते सेतिप्याह॥ एवमिति द्वाभ्यां॥ ३४॥ क्षितेर्भाराय जन्म येषां अक्षौहिणीभिः कृत्वा परिवृत्तं सर्वतः प्रसृतं तेजः प्र
भावो येषां श्वसनो वायुर्वेणूनां मिथः संघर्षणोत्थमनलं विधाय मिथो दाहेन यथोपशमं प्राप्नोति तद्वत्॥ ३५॥ स्त्रीरत्न
कूटस्थः उत्तमस्त्रीकदंबमध्यस्थः॥ तन्नेवं स्त्रीसंगादिभिः संसारप्रतीते॥ कथं भगवानवतीर्ण इत्युच्यते॥ तत्राह उद्दाम

॥ ॥ ३५

यः यस्मात् निर्मंसदाश्रयकृतं निरीक्षमाणानामपि दृष्टौ नैव तृप्यंति अतश्चारुरूपः ॥ २५ ॥ कथंभूतं श्रियः शोभायाः यामस्या
नं श्रेष्ठं यस्मात् ॥ एतदेवाभिनयेनेमाह श्रिय इति लक्ष्म्याः निवासो यस्य सः वदतः ॥ यस्य मुखं सर्वप्राणिनां चक्षुषां सौंदर्यस्ततपाना
यपात्रं यस्य बाहवो लोकपालानां निवासः ॥ सात्वंता यंतीति सात्वंता भक्ताः तेषां यस्य पदांबुजं निवासः तं निरीक्षमाणा
नां रंशश्वतिपूर्वेणान्वय ॥ २ ॥ सितैरातपत्रैर्व्यजनैरुपस्कृतः मंडितः अर्कांशुभिः पथ्युलसत्तसहितः ॥ चंद्रसवपश्चिनीस्थ

नित्यं निरीक्षमाणानां यदपि द्वारकौकसाम् ॥ नवितृप्यंति हि दृशः श्रियो धामांगमच्युतम् ॥ २४ ॥ श्रियो
निवासो यस्योरः पानपात्रं मुखं दृशां ॥ बाहवो लोकपालानां सारंगाणां पदांबुजम् ॥ २५ ॥ सितातपत्रव्यजनै
रुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि ॥ पिशंगवासा वनमालया बभौ घनो यथार्कोडुपचापवैद्युतैः ॥ २६ ॥ चापः
प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः ॥ ववंदे शिरसा सप्त देवकीप्रमुखा मुदा ॥ २७ ॥ ताः पुत्रमंक
मारोप्य स्नेहस्नुतपयोधराः ॥ हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः ॥ २९ ॥ अथाविशत्स्वभवनं सर्व
काममनुत्तमम् ॥ प्रासादा यत्र पत्नीनां सहस्राणि च षोडश ॥ ३० ॥ ॥ ॐ रामायनमोनमः ॥ ॥ ॥

उपस्कृतः विद्युत्तेजः तैर्युक्तो घनो यथा अर्कः उडुपः सोमः आभ्यां नंदनात्प्राणयुक्तः चंद्रः पश्चिममङ्गलमंडलाकारयोः चा
मरव्यजनयोः चापं वनमालया विद्युत्तेजः पिशंगवाससः अभूतोपमेयं यदिद्वनस्योपरिस्थितं विवस्वतः अयतः चंद्रोऽस ॥
वर्तीन नक्षत्राणि मध्ये च मिलितानि चापदृश्यं स्थितं च विद्युत्तेजो यदि भवेत्तर्हि सदृशोऽयं बभातीति न्यायाह विर्भाविनम्र ॥ २७
देवकीप्रमुखाः सप्त ववंदे इति मातृसौंदर्यशेषसप्तानामर्थः ॥ अष्टादशापि वसुदेवस्य भार्या मातृतुल्यत्वात्त्रसस्का ॥
नाएव ॥ २८ ॥ सहस्राणि षोडशेति च कारादष्टोत्तरशतमाधिकानीति ज्ञेयं ॥ ३० ॥

श्री भाग्र. टी. ३२

पुरोक्तं यत्तस्संस्थायद्रोणिदंडादि विस्तरात् ॥ तदत्रोत्तरजन्माह परीक्षिज्जन्मपरीक्षितेः ॥ परीक्षितोथराजर्षेर्जन्मकर्मविलापनं संस्थां च पांडुपुत्राणां वक्ष्ये कृष्णकथोदयं ॥ इति प्रतिज्ञातं यत्पांडवानां राजस्त्रिकिलि कृष्णपांडवानां सम्प्रसंगस्समस्याध्यायमारभ्य निरूपितं ॥ इदानीं सोपि यो ज्ञातिकतया तत्कृष्णानुवादपूर्वकं पृच्छति अश्वत्थाम्नेति ॥ उपसृष्टेन तस्य जन्मेत्यादि ब्रूहीत्यन्तेनान्वय १
स्य परीक्षित्प्रश्नदेहं तत्कर्मापार्थे येन वा तत्पयासौ न्याहगदितुं यदि मन्यसे श्रद्दधानानां नो ब्रूहीति यस्य ज्ञानमदात् शुक इति ॥ अवतारकार्याकारणानिःस्पृहस्यापि रामः श्रीकृष्णानुग्रहान्नाह कृष्णात्रासममजनी तिवर्कं तस्य युधिष्ठिरस्य श्रीकृ

शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा ॥ उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ॥ १ ॥ तस्य जन्म महाबुद्धेः कर्माणि च महात्मनः ॥ निधनं च यथैवासीत्स प्रेत्य गतवान्यथा ॥ २ ॥ तदिदं श्रोतुमिच्छामो गदितुं यदि मन्यसे ॥ ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥ ३ ॥ सूत उवाच ॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्रजाः ॥ निःस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥ ४ ॥ संपदः क्रतवो लोका महिषी भ्रातरो मही ॥ जंबूद्वीपाधिपत्यं च यशश्च त्रिदिवं गतं ॥ ५ ॥ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विज ॥ अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ६ मातुर्गर्भगतो वीरः स तदा भृगुनंदन ॥ ददर्श पुरुषं कंचिद्दह्यमानोऽस्त्रतेजसा ॥ ७ ॥ राम लोकाः

